॥ श्रीजिनाय नमः ॥

# ॥ श्रीरत्नशेखरचरित्रं ॥

( कर्ता—श्रीदयावर्धनगणी )

छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज ( जामनगरवाळा )

वीरसंवत्—२४४२. विक्रमसंवत—१९७२. सने—१९१६.

किं. रु.-१-२-०

श्रीजैनभास्करोदय प्रेस. जामनगर.

५९२

Scanned by CamScanner

॥ श्रीजिनाय नमः ॥

॥ श्रीचारित्रविजयगुरुभ्यो नमः ॥

# ॥ अथ श्रीरत्नशेखरचरित्रं प्रारभ्यते ॥

( कर्ता—श्रीदयावर्धनगणी )

छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज. ( जामनगरवाळा )

सयलकल्लाणनिलयं । नमिऊणं वद्धमाणपयकमलं ॥ पव्वतिहीइ वियारं । वुच्छामि जहागमे भणियं ॥ १ ॥ रायगिहे गुणसिलए । समोसढं जिणवरं महावीरं ॥ पुच्छइ गोयमसामी । सुरनरखयरिंदपरिचरियं ॥ २ ॥ तेलुक्कनाह साहसु । कत्ति य पव्वाणि किं फलं तेसिं ॥ तब्भंगे को दोसो । भणइ जिणो गोयमा सुणसु ॥ ३ ॥ संवच्छरियं पव्वं । चउमासतिगं होइ णायव्वं ॥ चउद्दसी पुन्निमासी । इक्कारसी अट्ठमीजुत्ता ॥ ४ ॥ बीयासु य तिहिसहिया । इमाणि पव्वाणि हुंति जिणसमए ॥ कायव्वो एएसु य । सव्वपयत्तेण पुण धम्मो ॥ ५ ॥ उक्तं च—संवच्छरचाउम्मासीएसु । अट्ठाहियासु य तिहीसु ॥ सव्वायरेण लग्गइ । जिणवरपूआतवगुणेसु ॥ ६ ॥ व्याख्या—संवत्सरपर्युष-

Scanned by CamScanner

णाचातुर्मासिकत्रिकं वर्षमध्ये चतुःपर्वीदिनं तथाष्टाह्निकाश्रुततिथिषु द्वितीयापंचम्येकादश्याराधनं शुक्लपक्षे शेषं व्यक्तं, तथा—अट्ठमी चउद्दसी पुन्निमा य । तहमावासा य हवइ पव्वं ॥ मासंमि पव्वछक्कं । तिन्नि य पव्वाइं पक्खंमि ॥ ७ ॥ पव्वेसु एसु विहिणा । जिणिंददिट्ठेसु जो कुणइ धम्मं ॥ सो पावइ परमपयं । लहिऊण पाहाणसुक्खाइं ॥ ८ ॥ पायं एएसु नरो । गावंमि सुहासुहंमि वट्टंतो ॥ परभवआउं बंधइ । नियपरिणामेण सारित्थं ॥ ९ ॥ जिणपूआसीलरओ । धम्मप्पाणीति दंडविरओ अ ॥ तह सामाइयपोसह—पच्चक्खाणे स उज्जुत्तो ॥ १० ॥ एएसुं दिवसेसुं । जीवो उववज्जिणइ नत्थि संदेहो ॥ वेमाणियदेवाणं । उत्तममणुआण वा रिद्धिं ॥ ११ ॥ पव्वतिहीअवियारे । दिट्ठंतो रयणसेहरनिवस्स ॥ सव्वासिं पुव्वाणं । उत्तरहेउं भणइ नाहो ॥ १२ ॥ अस्य कथा चिरंतनग्रंथस्य दुरवगमत्वाचंपूकथाबंधेनैव प्रपंच्यते, तथाहि—अस्ति जंबूद्वीपे भरतक्षेत्रे समग्रनगरगुणप्रवरं रत्नपुरं नाम नगरं, यत्पौरप्रकृतापार—पुण्यवारिनिधेरिव ॥ दिवि तारा विराजंते । डिंडीरपटलोपमाः ॥ १३ ॥ राजतेस्म नृपरत्नशेखर—स्तत्र मित्रितनवप्रभाकरः ॥ मंडलाग्रमवलोक्य संगरे । यस्य शत्रुतिमिरैः पलायितं ॥ १४ ॥ तस्य द्वितीयं हृदयमिव, तृतीयं नेत्रमिव मतिसागरो नाम

मंत्री, तरंती सत्वरं जाड्यो—ज्झिता व्यापारसागरं ॥ चित्रं यस्य मतिनौका । क्वापि दुर्गेऽपि नास्खलत् ॥ १५ ॥ तेन मंत्रिणान्वितोऽन्यदा नृपो वसंतलक्ष्मीं वीक्षितुं वने ययौ, यत्र चंपकशिरीषमल्लिका—पाटलासु मकरंदलंपटाः ॥ झंकृतीर्विदधतो विरेजिरे । श्राद्धिकद्विजनिभा मधुव्रताः ॥ १६ ॥ त्वं चराचरसमुद्रमेखला—धीश्वरोऽसि किमियं तवाभिधा ॥ युज्यते ज्ञपयतीति कोकिला—कूजितैस्तमवनीपतिं वनी ॥ १७ ॥ तत्रायं विविधक्रीडां विधायाम्रतरोस्तले निषण्णः, स तत्र शाखास्थं किन्नरमिथुनमपश्यत्. अथ किन्नरी तं वीक्ष्य स्वपतिंप्रति प्राह हे प्रिय ! या रत्नवती कन्यात्वयाऽन्यां तत्रेक्षिता सा कीदृशी ?—रयणवई जा कन्ना । दिठ्ठा दिठ्ठीए अमयवुठ्ठिसमा ॥ निज्जिअसव्वसुरासुर—सुंदरिसोहग्गमाहप्पा ॥ १८ ॥ किं बहुणा भणिएणं । जीसे रूवंमि गोयरं पत्ते ॥ रंभेव साररहिआ । रंभापडिसाइ देवाणं ॥ १९ ॥ आजम्मं पुरिसाणं । नाणागुणरयणधारयाणंपि ॥ पिछंती दोसभारं । नियरूवमउप्फुडावेसा ॥ २० ॥ सा नरद्वेषिण्यप्येनं वरं चेद्वरोति तदा सुष्टु मन्ये. किन्नरेणोक्तं—भमरी भमइ वणंतरिहिं । कह विरहेण न करेइ ॥ चंपयतरु पामइ । किमइ तओ एग न भरेइ ॥ २१ ॥ इत्युक्त्वोड्डीनौ तौ, नृपः केयं रत्नवतीति चिंतयन् स्मरेण वेध्यमकारि. अहो काम-

स्य वामत्वं । वामनेत्रशरेण यः ॥ नरामरसुरादीनां । रीणत्वं कुरुते रणे ॥ २२ ॥ राजा तद्ध्यानोपगतो योगीश्वर इव न जल्पति, न श्वसति, न हसति च, किंबहुना ? तद्ध्यानं चेज्जिनधर्मे भवति, तदा सिद्धिः करतलगैव, यदुक्तं—जा दव्वे होइ मई । अहवा तरुणीसु रूववंतीसु ॥ सा जइ जिणवरधम्मे । करयलमपट्ठिया सिद्धी ॥ २३ ॥ यद्दाये धृतकारस्य । यत्प्रियायां वियोगिनः ॥ यड्डाधावेधिनो लक्ष्ये । तद्ध्यानं मेऽस्तु त्वन्मते ॥ २४ ॥ तावन्मंत्री तत्रागतो नृपं तादृशं दृष्ट्वात्याग्रहेण तत्स्वरूपं च पृष्ट्वा किन्नरमिथुनं प्रष्टुं पृष्टतोऽधावत. तत्र वृक्षाद् वृक्षांतरे चलद्वीक्ष्य पश्चान्निवृत्तः, नृपस्तदा वह्नौ पतितुमारेभे. मंत्रिणा चिंतितं धिग्नृणां स्त्रीन्यः पारवश्यं ! तावन्महत्त्वं पांडित्यं । कुलीनत्वं विवेकिता ॥ यावज्ज्वलति नांगेषु । हंत पंचेषुपावकः ॥ २५ ॥ विषमा खलु विषयगतिः, यत उक्तं—विषस्य विषयाणां तु । दूरमत्यंतमंतरं ॥ उपभुक्तं विषं हंति । विषयाः स्मरणादपि ॥ २६ ॥ नाम्ना न हि विषं हंति । स्वप्ने दृष्टमपि क्वचित ॥ स्वप्नेनापि हि नाम्नापि । हंति नारीविषं क्षणात् ॥ २७ ॥ किमु कुवलयनेत्राः संति नो नाकनार्य—स्त्रिदशपतिरहल्यां तापसीं यत्सिषेवे ॥ हृदयतृणकुटीरे दीप्यमाने स्मराग्ना—वुचितमनुचितं वा वेत्ति कः पंडितोऽपि ॥ २८ ॥ त-

था—संसारे हयविहिणा । महिलारूवेण मंडियं पासं ॥ बझंति जाणमाणा । अयाणमाणावि ब-
झंति ॥ २९ ॥ संमोहयंति मदयंति विडंबयंति । निर्भर्त्सयंति रमयंति विषादयंति ॥ एताः प्रवि-
श्य सदयं हृदयं नराणां । किं नाम वामनयना न समाचरंति ॥ ३० ॥ अथ मंत्री नृपप्राणरक्षार्थं
सप्तमासावधिं कृत्वा भृत्येनैकेन युतो दक्षिणां दिशंप्रत्यचलत, हृष्टो नृपोऽप्याशिषं ददौ, यथा—तव
वर्त्मनि वर्ततां शिवं । पुनरस्तु त्वरितं समागमः ॥ अयि साधय साधयेप्सितं । स्मरणीयाः समये
वयं वयं ॥ ३१ ॥ पुनरपि राजा प्राह—अरिहंता मंगलं तुज्झ । सिद्धा मंगलमुत्तमा ॥ मंगलं साहु-
णो सव्वे । जिणिंदधम्मो अ मंगलं ॥ ३२ ॥ सीसं तुह अरिहंता । सिद्धा वयणं हियं तु आयरि-
आ ॥ करजुअलमुवज्झाया । अवंतु मुणिणो य पयकमलं ॥ ३३ ॥ एएसिं च पभावा । सिद्धी क-
ज्जस्स होउ निव्विग्घा ॥ खेमं वट्टउ मग्गे । सिग्घं पुण दंसणं दिज्जा ॥ ३४ ॥ सोऽपि पृथिवीं भ्र-
मन्नन्यत्र क्वापि वने रत्नमयभवने कन्यामेकां वीक्ष्याचिंतयत्, यथा—अमरी किन्नरी वेयं । खेच-
री वा महीचरी ॥ केनापि कारणेनान्—दन्या कन्या घटेत न ॥ ३५ ॥ राहोरहिरिपोर्भीत्या । श-
शिना शेषभोगिना ॥ वक्रवेणीनिभादेणी—नेत्रासौ किं शरण्यिता ॥ ३६ ॥ इति ध्यायन्नवग् बा-

Scanned by CamScanner

ले ! का त्वं ? सावदद्रत्नवेश्मस्वामिनो यक्षस्य सुताहं, तेनोक्तं स क्वास्ति ? सावदत्पातालगृहे, तेन पृष्टं तस्य को मार्गः ? तयोक्तं ज्वलद्वह्निकुंडे पतनं. इति श्रुत्वासावचिंतयन्मया तत्र गंतव्यं, साहसं विना न सिद्धिः, यतः—साहसीयां लच्छी हवइ । न हु कायरपुरिसाणं ॥ कन्नाणं कंचणकुंडला । अंजणं पुण होइ नयणाणं ॥ ३७ ॥ तं कांइ आरंभीइ । महिमंडले जस्स विवसाओ ॥ जाणिऊण सिर धुणइ । हरिहरविहिजमरायाओ ॥ ३८ ॥ अथासौ स्वशुद्धिज्ञापनाय तं भृत्यं नृपपार्श्वे प्राहिणोत्, सोऽपि सर्वं वृत्तांतं नृपायाचीकथत, नृपोऽपि मंत्रिणं प्रशंसयन्नाह—भवता खेलितं सत्वं । भाग्यं फलतु मे पुनः ॥ मंत्र्यपि प्रातः स्नात्वाहो सत्वमिति बालयालप्यमानो वह्निकुंडेऽपतत, तत्क्षणं यक्षप्रभावादक्षतांगो भूत्वा पातालगृहे सिंहासनमलंचकार. यक्षोऽपि यक्षिणीयुक् प्रत्यक्षीभूय तामेव कन्यां ढौकनीचक्रे. यक्षेणोक्तं च चिरं मार्गं पश्यतामस्माकं त्वं प्राप्तोऽसि, तस्मादेतां मम सुतां वृणु ? इति यक्षेणोक्ते मंत्र्याह देवास्तु निरपत्या भवंति, तस्मात्कथं ते सुता ? यक्षोऽवादीत् शृणु ? भूभामिनीतिलके तिलकपुरे द्विधापि धनाढ्यः श्रेष्ठी, तस्य श्रीमती कांता कांतभक्ता. अन्यदा श्रेष्ठी जयसिंहसूरिगुरुं वने समेतं श्रुत्वा तं नंतुं ययौ. गुरुभिर्व्याख्याने पर्वतिथिवर्णनं कृ-

Scanned by CamScanner

तं, तथाहि—जइ सवेसु दिणेसु । पालह किरियं तओ हवइ लठं ॥ जइ पुण तहा न सक्कइ । तहवि हु पालिज्ज पवदिणं ॥ ३९ ॥ जं पवदिवसेसु थोवमवि धम्माणुठाणं बहुफलं होइ. उक्तं च श्रीसिद्धांते—भयवं बीयपमुहासु तिहीसु विहियं धम्माणुट्ठाणं किं फलं होइ? जम्हा एयासु तिहीसु पाएणं परभवाउअं कम्मं समज्जिणइ, तम्हा साहुणा वासाहुणीए वासावएणं वामावियाए वा अन्नेण वा जीवेण तवोविहाणाइ धम्माणुठाणं सुहपरिणामेणं कायवं. जम्हा सुहआउयं कम्मं अज्जिणइ. इति निरयावलयासुयक्कंधे. तथा—बीया डुविहे धम्मे । पंचमी नाणेसु अठमी कम्मे ॥ एगारसि अंगाणं । चउद्दसी चउदपुवाणं ॥ ४० ॥ आवश्यकेऽपि—सवेसु कालपवेसु । पसत्थो जिणमए तवो जुग्गो ॥ अट्ठमी चउद्दसीसु य । नियमेण हविज्ज पोसहिओ ॥ ४१ ॥ पौषधाधिकारे श्रीभगवतीसिद्धांतेऽपि—तत्थ णं तुंगियाए नयरीए बहेसमणोपासगा वसंति, इढ्ढागिदित्ता विच्छिन्नविउलभवणसयणासणजाणवाहणाइन्ना बहुजायरूवरयणा अठमीचउद्दसीपुन्निमासु पडिपुन्नं पोसहं कारेमाणा पालेमाणा इत्यादि. लोकेऽपि—चतुर्दश्यष्टमी चैव । ह्यमावास्या च पूर्णिमा ॥ पर्वाण्येतानि राजेंद्र । रविसंक्रांतिरेव च ॥ ४२ ॥ तैलस्त्रीमांससंभोगी । पर्वस्वेतषु वै पुमान् ॥ वि

एमूत्रनोजनं नाम । नरकं याति वै मृतः ॥ ४३ ॥ इत्थंतरे सेणिओ भणइ—भयवं किं कायव्वं ? किं च वज्जेयव्वं ? जिणो भणइ पव्वतिहीसु पढमं सत्तिसंभवे पोसहोववासो कायव्वो. जइ कहवि उववासं करिउं न सक्कइ. तओ जहासत्तीए अविरुद्धाइन्नं किच्चा पोसहं करेइ. तदभावे उत्तओ सामाइयं. सव्वचेइए साहुवंदणं. चउव्विहसज्झायकरणं. जहासत्तीए सब्भिंतरबाहिरतवोविहाणं. सच्चित्ताहारवज्जणं. बंभचेरधारणं. इच्चाइधम्माणुट्ठाणं कायव्वं. तथा—नाणं चीवरधोवण—सयगुंथण-मबंभचेरं च ॥ खंडणपीसणलिंपणाइ । वज्जेयव्वाइं पव्वदिणे ॥ ४४ ॥ इत्युपदेशं श्रेष्ठी श्रुत्वा पर्वतिथिषु निशामाहृत्य गृहमागात. धर्मकृत्यं कुर्वन् सुखेन कालं गमयति. अन्यदाष्टम्यां पौषधं लात्वा स्वगृहे कायोत्सर्गे तस्थौ. तावत्सौधर्मेन्द्रेण तत्प्रशंसा कृता. तदश्रद्दधानो माणिभद्रो देवस्तत्रागत्य तमक्षोभयत. परं न चुक्षोभ. हृष्टो देवस्तत्पुरो नाट्यं चक्रे. सूर्योदये कायोत्सर्गे पारिते देवोऽवदत्तुष्टोऽस्मि. वरं वृणु ? श्रेष्ठी नेहते किंचित. तथापि व्योमगामिनीं विद्यां ददौ. परमूत्रे एषा वार्ता द्वितीयं जनं विना तृतीयो न ज्ञाप्यः. यदा तृतीयो ज्ञास्यति तदा त्वमाकाशात्पतिष्यसि. ततो देवः स्वर्ययौ. श्रेष्ठी स्वगृहमाययौ. विद्ययाष्टापदादिषु दूरेष्वपि तीर्थेषु देवान्नमति. कांतया स्वरूपं पृष्टेन

श्रेष्टिना स्नेहात्तस्याः पुरः सशपथं कथितं. अथान्यदा श्रेष्ठी जिनान्नत्वा पश्चादवलते तावन्नभसो भू-
तले एकस्मिन् सरोवरे पपात. तेन चिंतितं हा किमेतत् ? किंतु गम्यं यच्छिलाया उपरि न पति-
तः. ततः स सरोवरान्निर्गत्य तत्पालौ निविष्टो दध्यौ. नूनं श्रेष्टिन्या कस्यापि कथितमस्ति. उक्तं च
—स्त्रीषु गुह्यं जले तैलं । सुपात्रे दानमुत्तमं ॥ शीघ्रं विस्तारमायांति । प्राज्ञे शास्त्रं तथैव च ॥ ४५ ॥
तथा—दुर्जनानां नरेंद्राणां । नारीणां च्छलसद्मनां ॥ विश्वासो नैव कर्तव्यः । कुगुरूणां विवेकिना
॥ ४६ ॥ स्त्रीणां गुह्यं न वक्तव्यं । प्राणैः कंठगतैरपि ॥ नीयते पक्षिराजेन । पुंडरीको यथा फणी
॥ ४७ ॥ तत्कथा चैवं—पुंडरीकनागो गरुडात् त्रस्तः क्वापि कुर्कुरग्रामे कामपि स्त्रियं भार्यां कृत्वा ग-
वान् पाठयंस्तिष्ठति विप्रवेषेण. अन्यदा तेन स्वस्वरूपं तस्या अग्रे कथितं. साप्यहं पुंडरीकनागवल्ल-
भेति जलहारिणीन्य आत्मानं प्रशंसयामास, तावता गरुडोऽपि तत् श्रुत्वा चटकरूपेण तद्भार्याया
घटस्योपरि चटित एव तद्गृहं ययौ. गरुडरूपेण च तं गृहीत्वा पत्न्यां पश्यंत्यामचलत्. पुंडरीकः स्त्री-
णां गुह्यं न वक्तव्यमिति श्लोकं पपाठ, गरुडेनापि स्वपक्षभित्तौ लिखित्वा स श्लोकः शिक्षितः. त-
तस्तद्भार्यया प्रोक्तं धिग्गुरुं भक्षयसि ? ततो गरुडेन लज्जया पुंडरीको मुक्तः स्वस्थोऽजनि. इत्यादि

Scanned by CamScanner

विकल्पयन् कष्टेन षड्भिर्मासैः स श्रेष्ठ्यष्टमीदिने सायं स्वगृहमागात्, परिजनो हृष्टः, श्रीमती कांत-
मायातं दृष्ट्वा प्रतिपत्तिं चक्रे, उत्थिता सा तं स्नपयितुं, सोऽवददद्याष्टमी पर्वास्ति, तयेषद्विहस्य प्रो-
क्तमियंति वासराणि शीर्षे जटाजूटादंगे मलक्लिन्नत्वाच्च तापसव्रतं वो जातमस्ति, षण्मासी क्रिया म-
य्येवासीदद्य सर्वं मुत्कलमिति हसंती तैलं शीर्षेऽक्षिपत्, सोऽपि स्नेहेन सर्वं संसेहे, स्नात्वा बुभु-
जे, भोजनादनु श्रीमत्या स्वपाणिना तांबूलपत्राणि दत्तानि, तेनाप्यद्याष्टमीति जल्पता तानि खा-
दितानि, पुनस्तेन प्रोक्तं च—चूर्णमानीयतां तूर्णं । पूर्णचंद्रनिभानने ॥ सीदंति स्वर्णवर्णानि । प-
र्णान्याकर्णलोचने ॥ ४८ ॥ तया चूर्णं ददे. एवं पर्वतिथ्यां तेन सर्वनियमभंगो कृतः, तदा श्रीम-
त्या गर्वोऽभूत्, तृतीयस्य कथनकारणं पृष्टा सा प्राह हे नाथैकदा मम सखी स्वभर्तुर्देवपूजादिकं व-
र्णयंती मया प्रोक्ता त्वं किं वेत्सि ? मम पतितुल्यः कोऽपि नास्ति. यमिंद्रः स्तौति, देवेन यस्मै न-
भोगामिनी विद्या ददे, तया विद्यया सोऽधुनाष्टापदं गतोऽस्ति, मयेयन्मात्रमुक्तं, तदनंतरं तेन स्व-
पतनादिवृत्तांतो कथितः. अथ तौ सुखेन तिष्ठतः, कालेन श्रीमत्या सुता प्रसूता, सातीव सुरूपास्ति,
तस्या लक्ष्मीरिति नाम कारितं, क्रमाल्लाल्यमाना सत्यष्टवर्षा साभूत्. अथैकदा तत्र केवली श्रीधर्म-

रत्न० चरित्रं ११

घोषसूरिरागात, श्रेष्ठी कांतापुत्रीयुक्तं नंतु ययौ, देशनायां केवलिना सकलकल्याणकुलभवनं धर्मः प्रकाशितः, यथा—धम्मेण रूवरिद्धी। धम्मेण नरामरिंदवरकामा॥ धम्मेण मुक्कमुक्कं। तम्हा धम्मायरं कुणह॥ ४९॥ तथा धर्मानुभावतो जीवानां वैमानिकादिदेवेषु गतिर्भवति, यथा—युगलिन ईशानांतदेवेषु यांति, संमूर्छजतिर्यंचो व्यंतरभवनपतिषु. विषभक्षणवह्निज्वलनकूपपतनरज्जुग्रहणक्षुत्तृड्मृता व्यंतरेषु, बालतपःकृतो बहुरुषोऽसुरेषु, तपसा ज्योतिष्केषु, परिव्राजका ब्रह्मलोके, पंचेंद्रियतिर्यंचः सहस्रारे, श्रावका अच्युते, यतिलिंगी मिथ्यादृग्ग्रैवेयकेषु, जिनवचनमश्रद्दधानो मिथ्यादृग्ज्ञेयः, पयमक्खरंपि इक्कं। जो नरो एय सुत्तनिद्दिठं॥ सेसं रोयंतोवि हु। मित्थादिट्ठी जमालिव्व॥ ५०॥ अत्र जमालिदृष्टांतः स्वधिया वाच्यः, छद्मस्थसाधुः सर्वार्थसिद्धौ, केवली सिद्धौ च, एषोत्कृष्टा गतिः, जघन्यतः सा श्राद्धसाध्वोः सौधर्म इत्यादि. अत्रांतरे श्रेष्टिना स्वगतिः पृष्टा, मुनिरूचे त्वं व्यंतरेषु यक्षो भावी, तव प्रिया च यक्षिणी भविष्यति. तेनोक्तं हा मुने! सम्यग्धर्मकृतो मम किमिदं फलं? मुनिरूचे पर्वतिथिषु नियमभंगात्त्वयेदमायुर्बद्धं. तत श्रुत्वा श्रेष्ठी स्वं भृशं निनिंद. केवल्यूचे—विसयासत्ता जीवा। लहंति नरनरयतिरियदुक्खाइं॥ विसयविसमोहियाणं।

नासइ धम्मफलं सव्वं ॥ ५१ ॥ तदाकर्ण्य श्रेष्ठिसुता लक्ष्मीर्दीक्षामयाचत, मुनिरूचे वत्से ! तवाद्यापि भोगफलं कर्म विद्यते, तव पितरौ मृत्वा रत्नाढ्यां यक्षौ भविष्यतः, तत्र रत्नशेखरनृपमंत्री मतिसागर एष्यति, स त्वां परिणेष्यति, यतः—तिव्वपरिणामवसओ । कम्मं जं जेण निम्मियं पुव्वं ॥ सुहमसुहं वा सव्वं । वेयव्वं तेण तं नियमा ॥ ५२ ॥ इति केवलिवचः श्रुत्वा ततस्त्रयोऽपि गृहमगुः. तौ दंपती मृत्वावां यक्षावभूतां, सा च सुतेयं स्नेहात्स्वांतिकमानीता, तदेनामुद्वह ? यतस्त्वनुरूपः संयोगो वरकन्ययोः, यतः—कत्थवि वरो न कन्ना । कत्थवि कन्ना न सुंदरो भत्ता ॥ वरकन्नासंजोगो । अणुसरिसो दुल्लहो लोए ॥ ५३ ॥ इत्युक्त्वा यक्षे स्थिते मंत्र्याह स्वामिकार्येऽमेके किमिदं युक्तं ? स्वामिवंचनापातकेनात्मा नरके पतेत, यत उक्तं—स्वामिद्रोही कृतघ्नश्च । मित्रविश्वस्तवंचकौ ॥ चत्वारो नरकं यांति । यावच्चंद्रदिवाकरौ ॥ ५४ ॥ ततो यक्ष उवाचाहमपि तव सांनिध्यकारी भविष्यामि. मंती भणइ को वचओ ? सो भणइ जइ तुह सामिकज्जं न करेमि ता पंचपव्वीनियमभंगपावेण लिंपामि. उक्तं च—जो गिण्हिऊण नियमे । गुरूण पासंमि खंडए मोहा ॥ अगहियपुणपडिवत्तो । दुल्लहबोही हवइ एसो ॥ ५५ ॥ ततः मंत्रिणा महोत्सवेन तस्याः पा-

णिग्रहणं चक्रे, तदा हृष्टो यक्षोऽवदद् हे मंत्रिन्! किं ते स्वामिकार्यं ? मंत्र्याह रत्नवतीक्ष्यते, तेन ज्ञानेन वीक्ष्य प्रोक्तं समुद्रांतः सप्तशतयोजनमाने सिंहलद्वीपे जयपुरे नगरे, कीदृग्विधे ?—इक्कुच्चिय जत्थ पुरे । दीसइ दोसो विमुक्कदोसेत्ति ॥ गिह्मइ य अदत्ताइं । परगुणरयणाइं हु निच्चं ॥ ५६ ॥ तत्र जयसिंहनामा राजा, स च कीदृशः ?—जह जिणवरिंदधम्मो । पवरो सव्वेसु होइ धम्मेसु ॥ तह एसो य रायगणे । नएण धम्मेण य पहाणो ॥ ५७ ॥ तस्य राज्ञः सुता रत्नवती ज्ञेया, सा च कीदृशी ?—किं बहुणा भणिएणं । तीए जइ कहवि देवरायवहू ॥ पुज्जइ समसीसीए । निरुवमलावण्णरूवेण ॥ ५८ ॥ मंत्री चिंतयत्यहो मदनभ्रमराज्ञो माहात्म्यं ! यत्तत्र स्थितेनापि निजयुवतिबाणेन विद्धोऽस्मद्राजा. ततस्तेन यक्षो विज्ञप्तो यथा मया तत्र गम्यं, यक्षेण निमिषमात्रेण जयपुरोपवने मुक्त्वा स उक्त इदं जयपुरं, ततो रूपपरावर्तिनीं विद्यां दत्वा कार्ये स्मर्तव्योऽहमित्युक्त्वा स यक्षोऽगात्. मंत्री प्राकारपरिखाप्रवरपौरावासमंन्वितं तत्पुरं पश्यति. यत्र भानुसखिकांचनकुंभा । जैनमंदिरशिरः परिगृह्य ॥ स्थानलाभविधुरं धृतदंभा—स्तर्जयंति तरणिं ध्वजहस्तैः ॥ ५९ ॥ अहो यदभ्रंलिहमंडपावली—शिरस्थितः पौरजनो निशाकरे ॥ करप्रयासेन विनापि बंधुरे । मुखं

सुखं दर्पणवद्विलोकते ॥ ६० ॥ अहो त्रिजगज्जनाश्चर्यभूता नगरशोभा ! धम्मेण समं लच्छी । व-
वहारो पुण नएण संजुत्तो ॥ माणेण जुअं दाणं । दीसइ लोआण जत्थ पुरे ॥ ६१ ॥ ततो मंत्री
पुरासन्ने यक्षदत्तविद्यया स्वर्णदंडमंडितकरा युवती योगिनी जज्ञे, सा योगिनी जनानां चित्रं कुर्वा-
णा कन्यांतःपुरप्रतोलीं प्राप्ता, प्रतीहारीनिवेदितांतर्गता, तत्र तां रत्नवतीं वीक्ष्य सा विसिस्मये, अहो
विधिना रूपसर्वस्वमत्र निक्षिप्तं ! पुनर्दध्यौ च—मत्तद्विपेंद्रगमना परितो दुकूल—वप्रा विभूषितघ-
नालकसत्पताका ॥ लीलावतीलसदुरोरुहसौधकुंभा । सेयं विभाति मकरध्वजराजधानी ॥ ६२ ॥ प-
क्वबिंबाधरा त्रस्त—मृगशावकलोचना ॥ पूर्णचंद्रानना सेयं । योग्या तस्यैव भूपतेः ॥ ६३ ॥ सा क-
न्यापि तामद्भुतां योगिनीं वीक्ष्यासनं दत्वा कुशलादि पप्रच्छ, तदा योगिन्याह—जर आवइ जोव्वण
गलइ । नित जगमतइ जाणि ॥ बाला कुसल न पुछीऐं । हाणिविहाणि विहाणि ॥ ६४ ॥ ग-
र्भावासे महादुःखं । विशेषान्निर्गमे पुनः ॥ जीवानां गर्भप्राप्तानां । स्वागतं पृच्छ्यते कथं ॥ ६५ ॥
तत श्रुत्वा चमत्कृता कन्या स्माह क भवतां निवासः ? योगिनी वदति—काया पाटण हंसराजा ।
फिरइ पवनतलारो ॥ तीणइ पाटण वसइ योगी । जाणइ योगविचारो ॥ ६६ ॥ तदा कन्ययाहो-

Scanned by CamScanner

ऽस्या वैराग्यरंग इति स्थापिता निजपार्श्वे. कौतुकेनैव मध्याह्ने जाते योगिन्या पात्रमपूरि, भोज-नादनु अध्यात्मविषये पृष्टा योगिनी प्राह—एकइ मढली पांच जणा । इकठ्ठा वसइ चंडाला ॥ नी-कालतां न नीकलइरे । तीणइ कीधो विटालो ॥ ६७ ॥ अयं मन एव मनोरोधे तु योगः, मनो यत्र मरुत्तत्र । मरुद्यत्र मनस्ततः ॥ अतस्तुल्यक्रियावेतौ । संवीतौ क्षीरनीरवत् ॥ ६८ ॥ यथा सिंहो गजो व्याघ्रो । भवेद्वश्यः शनैः शनैः ॥ अन्यथा हंति यंतारं । तथा वायुरसंयतः ॥ ६९ ॥ युक्तं युक्तं त्यजेद्वायुं । युक्तं युक्तं च सेवयेत ॥ युक्तं युक्तं च बध्नीया-देवं सिद्धिमवाप्नुयात ॥ ७० ॥ रेचकाद्रेचयेद्वायुं । पूरकाद्वायुपूरणं ॥ स्तंभकात्स्तंभयेद्वायुं । सर्वरोगान् विवर्जयेत् ॥ ७१ ॥ एवं गोष्ठ्यामन्यदा सा कन्या तां योगिनीमेकांते प्राह हे योगिनि कुतस्ते यौवने वैराग्ययोगः ? सा प्राह—जम्मजरामरणाणं । ठाणं संसार एव सव्वेसिं ॥ वेरगस्स निमित्तं । संजोगविजोगदुहभरिओ ॥ ७२ ॥ विशेषेण पुनर्हस्तिनापुरे नगरे सूरक्षत्रियस्तद्भार्या गंगा, तयोः कन्या सुमतिः, सा पितृमातृभ्रातृमातुलैः पृथक् पृथग्वरेभ्यो दत्ता, तदैकत्र लग्ने चत्वारोऽपि ते तां परिणेतुं समायाता योद्धुं लग्नाः परस्परं, तद् वृत्तांतं ज्ञात्वा सा जनक्षयं च वीक्ष्य चितां विधाय वह्निमाविशत्. तद् ज्ञा-

त्वा तेषु चतुर्षु वरेष्वेकश्चितायामपतत्, द्वितीयोऽस्थीनि, तृतीयश्च भस्म लात्वा गंगां समुद्रं च प्रतिक्षिप्तुमचलत्, तुर्यस्तु तत्रैव स्थितश्चितास्थाने भोजनावसरे पिंडमेकं मुक्त्वा शेषं भुंजंस्तत्र तिष्ठति, तृतीयो मार्गे गछन् रंधिनीगृहेऽन्नं कारितवान्, भोक्तुमुपविष्टः, सा परिवेषयति, तद्बालस्तु रोदिति, कार्यं कर्तुं नो दत्ते, तया स उत्पाट्याग्नौ क्षिप्तः, स भोजनं त्यक्त्वोत्थातुं लग्नः, तेन चिंतितं चाहो एतत्पापिनीगृहं ! तदा सा तमूचे भ्रातः ! सुखेन भुंक्ष्व ? अपत्यानि कस्यापि नानिष्टानि, यत्कृते पितरौ किं किं न कुरुतः ? पश्चादहमेनं जीवयिष्यामि, सोऽपि द्रुतमेव भुक्त्वोत्थितः, सापि गृहमध्यात्कुंपमानीय तस्मादमृतछटां चिक्षेप, निर्गतश्च रणद्घुर्घुरो बालोऽनलात्. अहो चित्रमिति चिंतयन् सोऽपि ग्रामांतर्दिनमतिक्रम्य सायं तद्गृहमागत्य हे भगिनि मम सार्थो नाभूदिति निशायामहमत्रैव स्थास्यामि, तया तत्प्रतिपन्नं. अथ रात्रौ तं कुंपकं लात्वा हस्तिनापुरमागात्, रकाके पश्यत्यमृतेन चितास्थानं सिषेच, उज्जीविता च सहसा दग्धपुरुषेण सह सा कन्या, तावता गंगायामस्थिक्षेप्याप्यागात्, पुनश्चत्वारोऽपि मिलिताः, परस्परं विवदंते, गताः सर्वेऽपि तत्र बालचंद्रराज्ञः सभायां, राज्ञा मंत्रिणो भाषिताः, यतः—आसन्ने रणरंगे । मूढे मंते तहेव दुप्भिक्खे ॥ जस्स मुहं

Scanned by CamScanner

जोइज्जइ । सो पुरिसो महियले विरलो ॥ ३३ ॥ वृद्धामात्येनोक्तं शृणुत ? भण्यते वादः, येनेय-
मुज्जीविता सोऽस्याः पिता, यस्तया सह जीवितः स तस्या भ्राता, येनास्थीनि गंगायां क्षिप्तानि
स पुत्रः, येन चितास्थानं रक्षितं सोऽस्या भर्ता भवतु. एवं वादे भग्ने शुभलग्ने चतुर्थेन रूपचंद्राख्य-
वरेण सा कन्योद्वोढा. ततः स स्वपुरं ययौ. तया भाग्यवत्या पत्न्या स सामान्योऽपि देशपतिर्जज्ञे.
यतः—कत्थवि वरपुन्नेणं । कत्थवि महिलाण पुन्नजोएण ॥ दुण्हवि पुण्णेण पुणो । कत्थवि संप-
ज्जए रिद्धी ॥ ३४ ॥ स स्नेहात्तां पट्टदेवीं चक्रे. रूपचंडोऽन्यदा तां वामपार्श्वे निवेश्य गवाक्षस्थो
मातंगतंगीभ्यां गीतमगापयत्, तदा मातंगीरूपं वीक्ष्य तस्यामनुरक्तः सोऽचिंतयत्—जन्मस्थानं न
खलु विमलं वर्णनीयो न वर्णो । दूरे शोभा वपुषि निहिता पंकशंकां तनोति ॥ यद्यप्येवं निखिल-
सुरभिद्रव्यदर्पापहारी । नो जानीमः परिमलगुणः कस्तु कस्तूरिकायाः ॥ ३५ ॥ इति विचिंत्य स
निजं हारं तस्यै ददौ, मातंग उक्तश्चेयं तव प्रिया त्वया मत्सौधपश्चाद्वाटिकायां प्रेष्या. तद्वीक्ष्य देव्या-
चिंति धिग् निर्ह्रीका नराः ! स्वाधीनेऽपि कलत्रे । नीचः परदारलंपटो भवति ॥ संपूर्णेऽपि तडागे ।
काकः कुंभोदकं पिबति ॥ ३६ ॥ अहो दुर्जयत्वं विषयाणां ! यतः—भिक्षाशनं तदपि नीरसमेक-

Scanned by CamScanner

वारं । शय्या च भूः परिजनो निजदेहमात्रं ॥ वस्त्रं विशीर्णपटखंडमयी च कंथा । हा हा तथापि विषया न परित्यजंति ॥ ७७ ॥ तथा—दुपरिच्चइया इमे कामा । नो सुजहा अधीरपुरिसेहिं ॥ अह संति सुव्वया साहू । जे तरंति अतरं वणिया वा ॥ ७८ ॥ इति विरक्ता सा योगिन्यभूत्. रूपचंडे निषिध्यति सावोचत—प्रत्यक्षेऽपि कृते पापे । मूर्खो नैवावबुध्यते ॥ स्कंधारोपितदुर्वृत्तो । नापितः पूरणो यथा ॥ ७९ ॥ तथाहि—क्वापि ग्रामे पूरणो नापितः, स मम भार्या दुश्चारिणीति शंकितो ग्रामांतरछलेन प्रछन्नो दिने स्थित्वा सायं स्वपत्न्यां नीराद्यर्थं गतायां स्ववेश्मागत्य खट्वाधोऽस्थात्, तद्भार्यापि तस्मिन् दिने हर्षिताभूत्. पुंश्चली मिलति येन येन तं । तं ब्रवीति मृदुमंदमानना ॥ आजनुर्न विदितो नरः पर—स्त्वन्निमित्तमिदमत्र साहसं ॥ ८० ॥ इति रीत्या केनापि नरेण सह घटित्वागत्य खट्वायां सुप्ता, तावदन्यनरोऽप्येत्य तल्पे निविष्टः, तमावर्जितुमुत्तिष्टंत्या इतस्ततश्चला-यास्तस्या हस्तोऽधःस्थितस्वपतिकाये लग्नः, सा शंकिता नूनं मत्पतिरेवेति. ततः सा परनरं प्राह हा जड मां सतीं मा स्पृश ? सोऽवदत्तत्किमाहूतोऽहं ? सावदत् शृणु ? अद्य रात्रौ मत्कुलदेव्याग-त्योचे वत्से त्वत्पतिर्मरिष्यति, भीताहं जगौ कोऽप्युपायोऽस्ति येन स जीवति ? देव्याहास्ति किंतु

त्वया स न सिध्यति, मयोक्तं प्राणानपि त्यजामि, देवी प्राह प्राणास्त्यज्यंते परं तन्न क्रियते, अहं जगौ तथापि कथय ? देव्याहान्यनरेण सह रमस्व ? मया कर्णौ पिहितौ, देव्याह तदान्यनरेण सहैकत्र स्थातव्यं तल्पे, तेन त्वत्पतिरद्य प्रभृति वर्षशतं जीविष्यति, तन्मया प्रतिपन्नं. देवी गता, ततस्त्वमाहूय तल्पे स्थापितोऽसि. न स्पृश्याहं त्वया, यतः—गतियुगलकमेवोन्मत्तपुष्पोत्करस्य । जिनपतितनुपूजा चाथवा भूमिपातः ॥ विमलकुलभवानामंगनानां शरीरं । पतिकरकरजो वा सेवते सप्तजिह्वः ॥ ८१ ॥ इदं श्रुत्वा मूर्खो नापितः स्त्रीचरित्रं सत्यं मन्यमानः खट्वाधो निःसृत्य हा पतिव्रते धन्योऽस्मीति वदंस्तौ द्वावपि स्कंधयोरारोप्य पटहं वादयन् मम पत्न्या वर्षशतं जीवितं वर्धितमिति हर्षतो नृत्यन् स्वजनगृहेषु भ्रमति. केनापि दक्षेण तद्भार्यास्वरूपं ज्ञात्वोक्तं ' प्रत्यक्षेऽपि कृते पापे इत्यादि, ' अहमपि किं नापितसदृशास्मीत्युक्त्वा सा योगिनी तत्पुरात्पृथिवीं भ्रमंत्यत्रागात्, साहमेव ज्ञेया, इति स्वमतिकल्पितं स्ववृत्तं कथितं, तत श्रुत्वा कन्याह—एसा सव्वाहणिज्जा । सुमई नामेण जोइणी नूणं ॥ एरिसकामगुणेसुं । जुव्वणसमयंमि जा विरया ॥ ८२ ॥ पुनर्योगिन्याह भद्रे त्वं कुतो नरद्वेषिणी ? सा निःश्वस्योचेऽस्तीयं महती कथा, परं कस्यापि कथितुं न शक्यते,

Scanned by CamScanner

यतः—जो जाणइ परदुक्खं । जो वा दुक्खस्स फेडणसमत्थो ॥ तस्स कहिज्जइ दुक्खं । किमन्नकहिएण दुक्खस्स ॥ ७४ ॥ परदुक्खं सुणिऊणं । जो पुरिसो होइ तेण समभावो ॥ अवहरइ अहव दुक्खं । सो दिठो णो मए नूणं ॥ ७५ ॥ तथापि भवतां सद्ध्यानतेजसा करकमलगृहीतमुक्ताफलवत्सकललोकस्वरूपं पश्यतां सर्वलोकमनोविश्रामस्थानानां सर्वकार्यकरणसमर्थानां च कथयामि, यथा हे सखि नाहं नरद्वेषिणी, किंतु वराभिलाषिणी, परं मंदभाग्याहं वरं न लभे, योगिन्युवाच नरविद्याधरभृतायां धरायां किं न कोऽपि योग्यो वरः? कन्या स्माह किं क्रियते तैर्येषु न स्निह्यते मनः, योगिन्याह क्व तव स्नेहः? तया प्रोक्तं पूर्वभवस्वामिनि, योगिन्योक्तं कः पूर्वभवस्वामी? तयोक्तं श्रूयतां?—अयोध्यासन्ने वने मृगो मृगी चाद्भुतां मिथः स्नेहपरायणौ. अन्यदा श्रीदशरथांगजः श्रीरामदेवस्त्यक्तराज्यो गृहीतसंयमस्तत्रागात, तस्मिंस्तत्र तपस्यति सिंहव्याघ्रा अपि शांता जाताः, यतः—उवसमइ तत्थ दुरियं । वयरविरोहो न हुंति केसिंपि ॥ पुन्नं पसरइ विउलं । विहरंति मुणीसरो जत्थ ॥ ७६ ॥ अन्यदा केनापि काष्टभारवाहकेनोक्तं हे मुने स्तोकाक्षरेण धर्मं वद? तदा श्रीराममुनिनोक्तं—धणओ धणत्थियाणं । कामत्थीणं च सव्वकामयरो ॥ सग्गापवग्गसंगम—

Scanned by CamScanner

हेउ जिणदेसिओ धम्मो ॥ ८७ ॥ यदि सर्वदिनेषु धर्मकरणाशक्तिस्तदा त्वया पर्वतिथिरेव पाल्या इत्युक्तं, बह्वारंभत्यागः पौषधविधिरुक्तश्च. ततो जातश्रद्धेन तेन पर्वतिथिस्वरूपं पृष्टो मुनिराह—बी-यट्ठमी इक्कारसी । तिहिओ चउद्दसी पुन्निमासी य ॥ एयाइं पुन्नकज्जे । भणियाइं जिणवरिंदेहिं ॥ ८८ ॥ तवनियमसीलपूया—पमुहं पुन्नं करेइ जो भवो ॥ एएसु पवेसुं । सो सुहकम्मं निबंधेइ ॥ ८९ ॥ ततस्तेन काष्टवाहकेन पर्वतिथिधर्मः प्रतिपन्नः, तत्रागताभ्यां ताभ्यां मृगीमृगाभ्यामपि तत् श्रुतं. ततस्तावपि पर्वतिथौ चतुर्विधाहारं त्यक्त्वा श्रीरामसमीपे तिष्टतः. नमस्कारोऽपि ताभ्यां हृदि शिक्षितः, तयोः संज्ञा सर्वास्ति. परं न वाचा. उक्तं च—आपदः पदमिच्छंति । इच्छंति पशवो गिरः ॥ मानवा ज्ञानमिच्छंति । सिद्धिमिच्छंति योगिनः ॥ ९० ॥ तौ च काले मृतौ. ततो मृगीजीवोऽहं राजसुता जाता. मृगजीवः क्वोत्पन्नस्तन्न वेद्मि, तेन तदभावे पाणिग्रहणं न करोमि. योगिन्याह कथं वेत्सि स्वपूर्वभवं ? तया प्रोचे जातिस्मरणज्ञानात्, योगिन्याह कुतो जातिस्मृतिः ? तयोक्तं शृणु ? यदाहमष्टवार्षिकी तदा कलाः शिक्षमाणा सुखेन कालं गमयामि. अन्यदाश्विने मासि पूर्णिमायां निशि सौधस्योपरि स्थितास्मि, तावदुदितः शशी, व्योम्नि वने सिंह इवोच्चैश्चटितश्च, तदा मम स-

Scanned by CamScanner

स्योक्तं—लक्ष्मीक्रीडातडागं रतिधवलगृहं दर्पणो दिग्वधूनां । पुष्पं श्यामालताया स्त्रिभुवनजयिनो मन्मथस्यातपत्रं ॥ पिंडीभूतं हरस्य स्मितममरसरित्पुंडरीकं मृगांको । ज्योत्स्नापीयूषवापी जयति सितवृषस्तारकागोकुलस्य ॥ ए२ ॥ मयाप्यालोकि मृगांकोऽमृतं वर्षयन्नेत्रयोः, तत्रस्थं च मृगं पश्यंत्या क्वाद्य कल्ये वा दृष्टोऽयमिति स्मरंत्या मे जातिस्मरणमुत्पन्नं, मूर्छिताऽहं भूमावपतं, सखीभिश्चंदनाद्यैः सचेतना कृता, ताभिः किमिदमिति पृष्टेऽसिध्यमानं कार्यं जल्पन् मूर्खो भवतीति धिया नोत्तरं ददौ. यतः—जो अन्नाय सरूवं । कज्जं निययं असज्जमाणं च ॥ साहइ परस्स एसो । केवलमुवहसणिज्जो? यगो होइ ॥ ए३ ॥ मम मृगजीवे परमः स्नेहोऽभूत्, स एव मे वरो भवत्विति निश्चिक्ये. तातोऽपि वरं चिंतयन्निषिद्धः, तत्प्राप्त्यै कामदेवमर्चयंत्यस्मि, परं तं वरं न लभामि. यतः—मणइवंछियसुहलाहो । सव्विंदियसुहगया सरूवत्तं ॥ नीरोगया य देहे । पुन्नेण विणा न जायंति ॥ ए४ ॥ तद्वियोगदुःखं मे हृदेव वेत्ति. यतः—दिण जाइ जणवत्तडी । पुण रत्तडी न जाइ ॥ अणुरागी अणुरागीया । सह जरीखजमाइ ॥ ए५ ॥ तथा—सखि मां सुखयति न शारदो । न शशी नांबुरुहं न चंदनं ॥ कदलीदलमारुतोऽपि न । तद्विरहानलदीप्तविग्रहां ॥ ए६ ॥ ततो हे सखि त्वं योगिन्य-

सि, ध्यानेन पश्य ? स मे भर्ता मिलिष्यति न वा ? योगिन्यपि ध्यानं नाटयित्वा हृष्टा प्राह हे व-
त्से ! तव मनोरथाः सिद्धाः, स्तोककालादेव स त्वां मिलिष्यति. कन्याह हे सखि स कथं मिलि-
ष्यति ? योगिन्यपि पुनर्ध्यानपूर्वमाह कामदेवप्रासादे नृत्यं कुर्वन् यस्तत्र तव प्रवेशं निवारयिष्यति
स पूर्वभवस्वामी तव पाणिग्रहणं करिष्यति. इति श्रुत्वा सा हृष्टा सती तस्यै विमलमुक्ताहारमर्पया-
मास. यतः–सव्विंदियसुहजणयं । सुच्चावि य नाम अमयबिंदुसमं ॥ हरिसरसाउ लहिय या । नारी
किं किं न अप्पइ ॥ ९७ ॥ एवं तयोः परं प्रेमाभूत. यतः—नारीजणस्स लोए । कुडिलसहावस्स
अथिरहिययस्स ॥ वल्लहनामग्गहणं । होइ अमंतं वसीकरणं ॥ ९८ ॥ अन्यदा योगिन्याह हे
वत्सेऽधुना यास्याम्यहं तीर्थानि नंतुं, न युज्यते योगिनामेकस्थाने बहु स्थातुं, यतः—मुत्तूण सय-
णवग्गं । इक्कं ठायं करेइ जो पव्वा ॥ सो पासंडी मूढो । परमप्पाणं च पाडेइ ॥ ९९ ॥ कन्या
साश्रुपातमाह—तुय विण दिण हउ गमे । किम एकलडी निरधार ॥ योगिन्याह–धीरी था दि-
ण थोडिले । मिलसे तुज भरतार ॥ १०० ॥ रत्नवत्यपि तवैव वचनं सत्यं भवत्विति वदंती तां व्य-
सृजत. योगिन्यपि यदं स्मृत्वा क्षणाद्रत्नपुरमगात्, तत्र पश्यति स सधूमं व्योम, वृक्षप्रासादशिख-

रस्थान् जनान्, नृपं च चितां प्रदक्षिणयंतं. अत्रांतरे जनैरूचे एका योगिनी ममेति. यावत्सा पृच्छ्यते तावत्कालं नृपो धार्यः, तावत्सापि समीपं समागताशिषं ददाना जनैर्नत्वोचे हे स्वामिनि सन्मासावधिः पूर्णः, नृपामात्यः समेष्यति न वा ? तावता नृपोऽवदद्यूयं मुग्धाः, स तु वह्निकुंडे पतित्वा मृतोऽस्ति, स पुनः कुत एष्यति ? यतः— सो वह्निकुंडमज्झे । पडिओ नाऊण कज्जविसमत्तं ॥ अब्भररसेण रसिओ । कहमायस्सइ महाभागो ॥ १ ॥ परं हे योगिनि ! वद ? दृष्टा श्रुता वा रत्नवती नाम्ना कापि ? योगिनी स्मारयित्वाह हुं अस्ति सिंहलद्वीपे राजसुता रत्नवती, तस्याश्चंद्रबिंबे मृगं पश्यंत्या जातिरस्मर्यत, पूर्वभवे सा मृग्यासीत, मृगजीवं विना च वरं न वांछति. नृपस्तत् श्रुत्वा जातिं स्मृत्वा हाहा प्रिये दूरे स्थितासि, किं कुर्वेऽहं ? उड्डीय वांछितं याति । वरमेते विहंगमाः ॥ न पुनः पक्षहीनत्वा—त्पंगुप्रायः कुमानुषः ॥ २ ॥ स कथमपि न रतिं लभते. यतः—रोगाणं पडियासे । दिठो सव्वत्थविविहजोगेहिं ॥ नेह रोगस्स होइ । संजोगेण च पडियारो ॥ ३ ॥ विलापं च करोति, यथा—हा पावदेव निग्घण । महमंती सव्वबुद्धिगुणनिलओ ॥ कम्हा तुमए हरिओ । मह रज्जसिरीइ आहारो ॥ ४ ॥ जम्हा असज्जकज्जं । सिज्झइ णो मंतिणं विणा रज्जे ॥ र-

विंबेण विणा को । हरिउं सक्केइ तिमिरभरं ॥ ५ ॥ हा दैवेन बुद्धिनिधिर्मे मंत्र्यपि हृतः, हा मंत्रिंस्त्वं क्वासि ? यथा सूर्यं विना ध्वांतै—दुर्भिक्षैर्जलदं विना ॥ दुःखैस्तथाभिभूतोऽहं । त्वां विना मतिसागर ॥ ६ ॥ एहि मंत्रिन्निति वदत्येव नृपे योगिनीरूपं त्यक्त्वा जातो मतिसागरो मंत्री, हृष्टो नृपः, जना अपि हृष्टाः, नृपेणालिंग्य स सर्वं वृत्तांतं पृष्टः, उक्तं च—अन्नुन्नदढालिंगण—पिलणसंजायसमिव सव्वं ॥ सुचिरं वियोगजणियं । दुक्खं हियया उप्भट्ठं ॥ ७ ॥ ततो मंत्री राजानं प्रणम्य रत्नवत्यर्पितहारार्पणपूर्वं सर्वं वृत्तमाचष्ट, तन्निशम्य राजा मंत्रिणं शंसति, यथा—कस्स न ते नमणिज्जा । केलीत्थंभोवमा महापुरिसा ॥ जे अप्पणो विणासं । फलाइं दिंता न चिंतंति ॥ ८ ॥ सव्वोपरोपयारं । करेइ नियकज्जसिद्धिणाभिरओ ॥ निरविक्खो नियकज्जे । परोवयारी हवइ धम्मो ॥ ९ ॥ मंत्री तदैव यक्षसान्निध्यात्ससैन्यं राजानं सिंहलद्वीपेऽमुंचत्, ततस्तत्रत्यजनैरयं राजाव कथमायात इति वीक्ष्यमाणः कतिभिः प्रयाणैर्जयपुरोद्याने समागत्य तत्र आवासः कृतः, पौरास्तं वीक्षितुमायांति, जयसिंहदेवेनापि सत्कृतो नृपः. अन्यदा कन्यागमावसरे मंत्रिगिरा प्रासादांतर्मंत्रिणा सह स द्यूतेन रंतुं लग्नः, तावत्कन्या सखीयुताऽऽच्छादितसुखासनस्था प्रासादद्वारं प्राप्ता, प्रतीहारी स्वर्ण-

Scanned by CamScanner

कंचया नरान्नाशयंती मध्ये प्रविष्टा, तावन्मंत्री नार्यो नार्य इति वदन्नग्रे पटीं धत्तेस्म, कन्या प्राह किं पटीं धत्से ? मंत्री प्राह नृपः स्त्रीं नेक्षते, कन्याह स्त्रीभिः किं पापं कृतं ? पृच्छ तव नृपं ? मंत्री नृपाभिमुखं वीक्ष्योचे, यथा—केता कहउं नारीतणा विचार । कूडां करइ कोडिगमे अपार ॥ बोलइ सविह न उ विरउंति नीर । जाणेइ नहि चोरतणी उ वीर ॥ १० ॥ तदा रत्नवती प्राह—लक्ष्मीप्रभुत्वमदयौवनरंगलीणा । मदोद्धता पाप करइं कुलीणा ॥ माता पिता स्वजनवर्ग न मानइं पि । वहु कीधो देवगुरुपमानइं ॥ ११ ॥ मंत्री कथयति—कथानकोवेन पुराणि कीधी । जे वात देवातणि न प्रसिद्धी ॥ किमइ न सूझइ किं हरइं जि चोला । नारी पिसाचीति भणइं निटोला ॥ १२ ॥ रत्नवती कथयति—गणइं न हि पाप न पुण्य शील । लुंपइं परनारीतणा सुसील ॥ दया मया धर्म न किंसिंइ लिजइं । धर्मी तणा नाम लिजीइं खीजइ ॥ १३ ॥ मंत्री कथयति—कूडां तणा कोडि करइ करावइ । नारी सदा साचपणुं जणावइ ॥ रुद्रा तणी राडि सदैव मांडइ । नीचा तणी संगि स्वधर्म गांडइ ॥ १४ ॥ कन्या कथयति—कुबोल बोलइ परमर्म सूझइ । जे धम्म नेउंपि न सार बुझइ ॥ दुखइ कुलस्त्री असती वखाणइ । ते आपणा माणसजन्म हारइ ॥ १५ ॥

Scanned by CamScanner

एवं विवादे जायमाने राज्ञोक्तं भो मंत्रिन्नबलया समं को विवादः ? कार्यं ब्रूहि ? ततस्तेनोक्तं हे रत्नवति ! मम स्वामी पूर्वभवप्रियामिच्छति, कन्या प्राह कः पूर्वभवः ? मंत्री नृपमीक्षते, नृपोऽवदत्किं बहूक्तेन ? एकमेव संकेतं वच्मि, यथा—हरिणी अन्नइ हरिण लउ । हुंता वनहमझारि ॥ कुणि पुन्निहिं हुं अवतरिओ । राजा इण संसारि ॥ १६ ॥ इति श्रुत्वा सापि निर्भरस्नेहाऽवदत्—हरिणी अन्नइ हरिण लउ । हुंता वनहमझारि ॥ पुव्वपुन्ने राजा हुओ । हुं ते हरिणी नारी ॥ १७ ॥ इत्युक्त्वा पटीमपसार्य तन्मुखचंद्रं स्वनेत्रचकोराभ्यां पिबंती राज्ञापीक्ष्यमाणा सस्मितौत्सुक्यानुरागरोमांचादिसात्त्विकगुणैरपूरि, जगौ च हे प्राणेश ! दूरस्थोऽपि त्वं मन्मनस्येवासि. राया दट्ठूण तयं । पुन्नं लायन्नपुन्नरसरासिं ॥ उल्लसिरपुव्वनियभव—निब्भरपिमाउलो जाओ ॥ १८ ॥ अहरियं नरनाहो । अतुलबलामोव मंमिओवि तया ॥ अबलाए पुण विद्धो । कम्मरकबाणेहिं तिक्खेहिं ॥ १९ ॥ सखीजन एतं वृत्तांतं तस्याः पित्रे न्यवेदयत, सोऽपि तत्रागत्य तं वरं वीक्ष्य हृष्टो वक्ति—सव्वपयारा रिद्धी । लब्भइ पुन्नेण जेण केणावि ॥ उत्तमनरसंपत्ती—सम्मं धम्मेण जं होइ ॥ २० ॥ पुव्वभवविहियसुचरिय—परिपागो एस उदयसंपत्तो ॥ तम्हारिस सप्पुरिसा । समागया जं महावासे ॥ २१ ॥

Scanned by CamScanner

ततः स तयोः पाणिग्रहणमहोत्सवं व्यधात्. तेन करमोचनावसरे करिशतं हयपंचशतानि बहुरत्नदुकूलवस्त्रादि दत्तं. सोऽपि रत्नवतीं परिणीय सुखेन निजावासं प्रत्यचालीत्, तूर्यरवेण बहुजनो वीक्षितुं मिलितः, तदा केचिद्वदंति, यथा—द्वीपादन्यस्मादपि । मध्यादपि जलनिधेर्दिशोऽप्यंतात् ॥ आनीय झटिति घटयति । विधिरभिमतमभिमुखीभूतः ॥ २२ ॥ केचिद्वृद्धा धर्ममेव स्तुवंति. यथा—धर्मतः सकलमंगलावली । धर्मतः सकलशर्म संपदः ॥ धर्मतः स्फुरति निर्मलं यशो । धर्म एव तदहो विधीयतां ॥ २३ ॥ अथ राजा कियद्दिनांस्तत्र सगौरवं स्थित्वा स्वपुरंप्रत्यचलत्, रत्नवत्यपि साश्रूंबां नत्वा शिक्षामयाचत्, सापि तामंके कृत्वा शिरः स्पृशंती साश्रुरूचे—गता पतिगृहं वत्से । गुरूणां विनिता भवेः ॥ कुर्यास्त्वं भोजनं भुक्ते । निद्रां सुप्ते च भर्तरि ॥ २४ ॥ नीरंगीछन्नवदना । नित्यं नीचैर्विलोचना ॥ कोकिलामधुरालापा । भवेस्त्वं श्वशुरालये ॥ २५ ॥ ननांदृप्रणतिं कुर्या । देवरेषु च गौरवं ॥ औचित्यकारिणी सर्व—परिवारेषु सर्वदा ॥ २६ ॥ इति मातृशिक्षां लात्वा तां नत्वा सा पत्या सहाचालीत्, तत्पितापि कियंति प्रयाणकान्यनुगम्य नृपेण सबहुमानं वालितोऽवनतां सुतांप्रति प्राह—पितात्मनः पुण्यमनापदः क्षमा—धनं मनस्तुष्टिरथाखिलं नृपः ॥ अतः परं पुत्रि

Scanned by CamScanner

न कोऽपि तेऽहमि—त्युदश्रुरेष व्यसृजन्निजौरसीं ॥ २७ ॥ रत्नशेखरनृपोऽपि द्वीपांताद्यक्षसांनिध्ये-
नोदधेरुपरि भूत्वा स्वपुरं गत्वा महर्घ्या प्रविश्य तां पट्टदेवीं कृत्वा न्यायेन राज्यं चक्रे. मंत्र्यपि य-
क्षसुतया सह सुखं बुभुजे. राजा राज्ञी च जातजातिस्मरौ पूर्वभवाभ्यस्तं पर्वदिनं पालयतः. अन्य-
दा पर्वतिथिपारणे कृतभोजनो नृपः पल्यंके क्षणं विश्रम्य यावदुत्थितस्तावद्देव्यपि वेणुवीणातालवृं-
तकर्पूरकस्तूरिचंदनादिपात्रकलितहस्ताभिर्युता तत्रागता, भद्रासने च न्यषीदत्. अथ यावद्राजा रा-
ज्ञी चान्योन्यं काव्यकथादिकं च वक्तः, यतः—गीतकाव्यविनोदेन । कालो गच्छति धीमतां ॥ व्य-
सनेन हि मूर्खाणां । निद्रया कलहेन वा ॥ २८ ॥ तावद् द्वौ शुकीशुकौ व्योम्नाभ्येत्य तयोः करे
स्थितौ, ताभ्यां विस्मिताभ्यां पक्षस्पर्शनपूर्वकं तावुक्तौ कुतो युवां ? शुकोऽवदत—यत्र रामश्चिरं त-
स्थौ । यत्र पंचापि पांडवाः ॥ क्रीडंति यत्र राजान—स्ततोऽस्माकमिहागमः ॥ २९ ॥ राज्ञा वनादि-
ति ज्ञातं, चिंतितं चायं शुकश्चतुरो दृश्यते, तं कांचित्समस्यां पृच्छामीति विचिंत्य सोऽपृच्छत्, यथा—
'न रजनी न दिवा न दिवाकरः' तदा शुकः प्राह—तव नरेंद्र रणांगणसंचर—त्तरलतुंगतुरंगखु-
रोद्धुते ॥ रजसि खं प्रतियाति विभाव्यते । न रजनी न दिवा न दिवाकरः ॥ ३० ॥ अथ राज्ञी

शुकींप्रत्याह—रोचते या सपुण्यानां । पापानां या न रोचते ॥ गौरांगी वल्लभा पत्युः । सा नारी मम कथ्यतां ॥ ३१ ॥ शुकी प्राह पूर्णिमा. शुको नृपमपृच्छत्—'मग्नः समुद्रो बेडायां' राजा नोत्तरं ददौ, तदा शुकोऽवदत—अगस्तिहस्तचुलुके । मातेऽब्धौ वाहनाकृतौ ॥ मग्नः समुद्रो बेडायामिति देवास्तदा जगुः ॥ ३२ ॥ राज्ञा त्रिपदी पृष्टा—आकाशे हरिणा यांति । वचा शुंठी हरीतकी ॥ आषाढी कार्तिकी माघी । इति त्रिपदानि प्रोक्तानि. चतुर्थं पदं शुकः प्राह—तिथीः कुर्वन्न जीवति ॥ ३३ ॥ नृप आह—विहिता निर्विषा नागा । देवाः शक्तिविवर्जिताः ॥ निश्चेष्टाश्च यया सिंहाः । सा बालैर्ध्रियते करे ॥ ३४ ॥ शुक आह—'चित्रलेखिनी.' अथ शुकी राज्ञींप्रति प्राह—किं जीवियस्स चिन्हं । का लज्जा होइ मयणरायस्स ॥ का पुप्फाण पहाणा । परिणीया किं कुणइ बाला ॥ ३७ ॥ सासरइ जाइ ॥ इति शमस्यादिविनोदान् कुर्वतावितस्ततो वीक्ष्य शुकाशुकौ मूर्छितौ तत्करात्पतितौ. चंदनादिना सिंचितौ, तथापि मूर्छा न वलिता, नृपेण देव्या च नमस्कारे दीयमाने तौ मृतौ, चंदनेन दाहः कारितः. इमौ काविति ध्यायतो नृपस्य प्रभाते जाते वनपालकेन विज्ञप्तं हे स्वामिन् श्रीधर्मप्रभाचार्या वनमलंचक्रुः, राजा तस्मै दानं दत्वा सांतःपुरपरीवारो गुरून्नंतुम-

Scanned by CamScanner

चलत्, गुरुसमीपे गत्वा राजा खड्गछत्रकिरीटचामरवाहनानि राजचिह्नानि त्यक्त्वा गुरून् ववंदे, य-
थाशातना न स्यात्तथा निविष्टः, रत्नवती राज्ञ्यपि स्त्रीवृंदांतःस्था गुरून्नत्वा यथास्थानं निविष्टा. इति
सभायां नरनारीनरेश्वरादिपूरितायां गुरुभिर्देशना चक्रे, यथा—पूआ जिणाणं गुरुभत्तिसारा । स-
व्वेसु जीवेसु दयापहाणं ॥ सत्तीइ दाणं गिहमागयाणं । एसो हि धम्मो सुहसिद्धिहेऊ ॥ ३८ ॥
अथ राजा यावत्तुकस्वरूपं प्रष्टुकामस्तावत्तूर्यरवोऽभूत्, जने पश्यति तत्रत्यधनश्रेष्टिपुत्री श्रीनाम्नी सु-
खासनस्था सखीभिः क्षणे क्षणे चंदनजलकदलीदलपवनैरुपचर्यमाणा तत्रागता. सुखासनादुत्तीर्य मु-
निं ववंदे, पित्रा निजोत्संगे न्यवेशि, ऊचे च हे स्वामिन्नस्यां जातायां मे राज्यमान्यता श्रीश्चाभू-
त्परमस्या यौवने किं दाहज्वरः ? मुनिरूचे—भोज्यं भोजनशक्तिश्च । रतशक्तिर्वरस्त्रियः ॥ विभवो
दानशक्तिश्च । नाल्पस्य तपसः फलं ॥ ३९ ॥ अनया सम्यक्तपो नाराधि. पुरा श्रीपुरासन्ने वने का-
पि वनेचर्यभूत्. एकदा सा मुनिं दृष्ट्वापृच्छत्कथमहमीदृग्दुःस्था ? मुनिराह, यथा—तवनियमसील-
रहिया । जिणधम्मपरम्मुहामहारंभा ॥ जीवा हवंति ठाणं । लोए नाणाविहदुहाणं ॥ ४० ॥ जे पु-
ण करंति धम्मं । दुकसहस्साण मोयणसमत्थं ॥ मणवंछियसुक्खाइं । पावंति सयावि ते नूणं ॥ ४१ ॥

Scanned by CamScanner

यत उक्तं—एक रंक एक नृपति राणा । हाथ पाय सवि हुंति समाणा ॥ ये तपचरण निश्चल साधइ । रायरिद्धिं बहुसुहं पावइ ॥ ४२ ॥ सावादीदहं किं तपः कुर्वे ? मुनिरुवाच सर्वेषु दिनेषु नो चेत्तदा पर्वदिने निर्विकृत्याचाम्लोपवासादि तपः कार्यं, यतः—थोवोवि तवो विहिणा । जिणवरभणिएसु पव्वदिवसेसु ॥ जो कुणइ तस्स होही । सुहसंपत्ती परभवंमि ॥ ४४ ॥ तया तत्कर्तुमारब्धं, साधुना प्रासुकवारियुक्तिश्चोक्ता, यथा—सावएण चाउलोदगं जवोदगं तुसोदगं वा पेयमिति. यदा सामग्री न भवति तदा गोमयं क्षारपानीयं वा कृत्वा पेयं, न पुनः सचित्तपानीयं पेयमिति. सा शुद्धं तपः करोति, परं प्रासुकनीरेऽलसा भवति, कदाचिदुष्णोदके मे न रुचिः. शीतलवारि विना मे न सौख्यमिति ध्यायति. कदाचिदल्पवेलं वा वेलातीतं पिबति. एवं तपः कृत्वा मृत्वा सेयं त्वत्सुता जाता, असौ भाग्यवती सौभाग्यवती च, किंत्वप्रासुकजलपानेन शरीरे दाहज्वरो भवति, संप्रत्यपि यदि प्रासुकं जलं पिबति तर्हि शनैः शनैस्तापः शमिष्यति. सापि पूर्वभवदुःकृतं निंदती स्नानपानादिषु प्रासुकं जलमेव गृह्णाति, तदैव प्रासुकजलेन शीतलांगा साभवत. तद्वीक्ष्य जना अपि प्रासुकजले सादरा अभवन्. अथ यावन्नृपः शुकस्वरूपं पृच्छति तावदकस्मात्खङ्गखेटकभृत्खे-

Scanned by CamScanner

चरः सन्नार्यस्तत्र रक्ष रक्षेति ब्रुवन्नागात्, तदा राजाह मा भैर्मा भैः ? खगोऽवदत्पश्य ? व्योम्नि शत्रु-
रन्येति, त्वमेनां मत्प्रियां क्षणं रक्ष ? यावदहं तं शत्रुं हन्मि. यतः—पिता रक्षति कौमार्ये । यौव-
ने दयितः पुनः ॥ पुत्रो रक्षति वार्धक्ये । न स्त्री स्वातंत्र्यमर्हति ॥ ४४ ॥ परं—खटिका खंडिका
चैव । नारी वापि तथैव च ॥ परहस्तगता प्रायो । घृष्टस्पृष्टैव लभ्यते ॥ ४५ ॥ इति न्यायान्न मे वि-
श्वासस्त्वयि, स्वं प्रत्ययं देहि ? राज्ञोक्तं—विश्वस्तं ये विनिघ्नंति । स्वामिनं वा नराधमाः ॥ तेषां
पापेन लिप्येऽहं । यदि गृह्णामि ते प्रियां ॥ ४६ ॥ धर्माक्षरं प्रदातारं । स्वं मन्यंते न ये गुरुं ॥ ते-
षां पापेन लिप्येऽहं । यदि गृह्णामि ते प्रियां ॥ ४७ ॥ दुर्लभं संयमं प्राप्य । ये त्यजंति नराधमाः ॥
तेषां पापेन लिप्येऽहं । यदि गृह्णामि ते प्रियां ॥ ४८ ॥ अदुष्टां पतितां भार्यां । ये त्यजंति विना
व्रतं ॥ तेषां पापेन लिप्येऽहं । यदि गृह्णामि ते प्रियां ॥ ४९ ॥ वियोजयंति ये बालान् । गवां स्त्री-
णां ग्रहेण वा ॥ तेषां पापेन लिप्येऽहं । यदि गृह्णामि ते प्रियां ॥ ५० ॥ खगः प्राहैतानि महापा-
पानि भवंति. परं शृणु ?—ये कुर्वंति महारंभं । श्रीमत्पर्वदिनेष्वपि ॥ तेषां पापेन लिप्येऽहं । य-
दि गृह्णामि ते प्रियां ॥ ५१ ॥ यद्येनं शपथं करोषि तदाहं मन्ये, नान्यथा. अथवा किमधुना ज-

ल्पितेन ? प्रथमं शत्रुं हन्मि, राज्ञा तत्प्रतिपन्नं. स स्वकांतां तत्पार्श्वे मुक्त्वा वैरिणा योध्धुं लग्नः, यावद्राजा चिंतयति कथमेषा नवयौवनमदप्रसरपूरितसर्वांगी रक्षणीया ? यतः—शास्त्रं सुनिश्चितधिया परिचिंतनीय—माराधितोऽपि नृपतिः परिशंकनीयः ॥ स्वात्मीकृतापि युवती परिरक्षणीया । शास्त्रे नृपे च युवतौ च कुतः स्थिरत्वं ॥ ५२ ॥ तथापि निजधवलगृहे मुंचामीति चिंतयन् गुरुन्नत्वोत्तस्थौ राजा, तावदेको हस्तश्छिन्नोऽपतत्पृथिव्यां, खेचर्योक्तं हा मम नाथस्य हस्तश्छिन्नः, राजाह कथं ? साह पश्य कज्जलांकितः ? तावत्पृथक् पृथदंगसहितं सखड्गं शिरोऽपि पपात, सा खेचर्यपि तद्वीक्ष्य हा हा प्रिय प्रियेति जल्पंती भृशं रुरोद, यथा—हा नाह पाणवल्लह । हा सुवणच्चयचरियसंजुत्त ॥ हा वीरपुरिससेहर । कह जायं एरिसं तुज्झ ॥ ५३ ॥ एयारिसिं अवत्थं । तुमंमि पत्तंमि पाणपियतमे ॥ अज्जवि जीवामि अहं । अइनिट्ठुरजावनरियंगी ॥ ५४ ॥ मह कंतह दो दोसडा । अवर मझंषि सिआल ॥ दिज्जंतां ञ्उं ऊारी फुझंतइं करवाल ॥ ५५ ॥ इति चिरं रुदित्वा नृपमग्निं ययाचे, नृपेण जनेन वार्यमाणापि चितां प्रदक्षिणयित्वोचे—पवन सुणे एक वत्तडी । हिव हउं होइ सुआर ॥ तिणि दिसिइ तउं उडीजे । जिणिं दिसिइं भरतार ॥ ५६ ॥ सा चितां वि-

वेश, सशोको जनो यावत्तिष्ठति तावदागाज्जितकासी खेचरः, स क्षिप्रं नृपं प्रणम्याह हे राजंस्त्व-
त्प्रसादाज्जितो वैरी, मम प्रियामर्पय ? तत श्रुत्वा राजा किमिदमिति चिंतयन्न वक्ति, तदा खेचरे-
णोक्तं—त्वत्तुल्या अपि नृपालाः । पालयंति न संगरं ॥ रमा रसातलं यातु । रविः पततु वा भु-
वि ॥ ५७ ॥ राज्ञोक्तं भो भद्र सा तु चितायां प्रविश्य मृतास्ति. तदा सोऽपि विलक्षो दिशो वि-
लोकयन् जनेषु साश्रुषु चितापार्श्वे गत्वोचे हा प्रिये त्वं क्वासि ? तदा चिताया हा प्राणेशावास्मी-
ति शब्दोऽभूत्. सोऽपि मम प्रियात्रास्तीति वदन्नपतच्चितां, जनो नृपश्च हा हेति करोति. तावन्न चि-
ता न खगः, किंतु सहस्रफणभृद्धरणेंद्रः पद्मावती च. तौ मुनिं नत्वा निषण्णौ नृपमूचतुर्हे पौत्र ! प-
र्वदिनं पालयेः, यदपालनात्त्वत्पितामहावावामष्टभवान् भ्रांतौ, जने साश्चर्यं नृपोऽवक्कथमहं पौत्रः ?
युवां च पितामहौ ? तदाह नागेंद्रोऽत्रैव पुरे पुरंदरो राजा, तस्य सुंदरी राज्ञी, तौ गुरूपदेशात् श्री-
पर्वदिनं पालयतः, तौ चापुत्रौ स्तः. अथैकदा पुरोहितेनोक्तं—विना स्तंभं यथा गेहं । यथा देहं
विनात्मतां ॥ तरुर्यथा विना मूलं । विना पुत्रं कुलं पतेत ॥ ५८ ॥ राजावदद्दैवाधीनमिदं. सोऽवक्त-
थाप्युपाया बहवः संति. एकमुपायमहमपि वेद्मि. देव्याह वद तं ? सोऽवक्कृष्णाष्टम्याममावास्याया-

माषणमासीं नरस्त्रियोः कृष्णतिलकुटिं भुंजानयोः पुत्रो शीघ्रमेव भवति. आम्नायश्चायं—सायं ति-लकुट्टिर्नोक्तव्या, निशीथे कांता च. ताभ्यामन्योन्यं वीक्ष्य तन्मतं कृतं. यतः—पाएण एस जीवो। मिथ्याणुठाणसायरो होइ ॥ नायरइ सच्चधम्मं । परभवअब्भासजोगेण ॥ ५९ ॥ यदुक्तं—स्वेना-साररुचिर्जीवो । बलात्सारे प्रवर्त्यते ॥ तृणमत्ति स्वयं वाजी । घृतमन्येन पाय्यते ॥ ६० ॥ लुप्तमेवं श्रीपर्वदिनसुकृतं, पुत्रोऽपि नाभूत्, हस्ते दग्धे, पृथुकोऽपि गतः. अन्यदा ताभ्यां कश्चित्साधुः पृष्टः, तदा मुनिरूचे यदि पापानुष्ठानात्पुत्रो भवति तदा सर्वस्यापि स्यात्, परं पुण्यादेव भवति, तच्च जि-नार्चादि, जिनार्चाफलं यथा—पुत्रं प्रसूते कमलां करोति । राज्यं विधत्ते तनुते च रूपं ॥ प्रमार्ष्टि दुःखं दुरितं च हंति । जिनेंद्रपूजा कुलकामधेनुः ॥ ६१ ॥ ततस्तौ सामायिकदेवार्चादयादिधर्मे त-त्परौ जातौ, जातः पुत्रो धर्मशेखरनामा, हे राजंस्तत्पुत्रस्त्वमसि. अथ तौ काले तदनालोच्य मृता-वजामेषौ जातौ, ततोऽपि शुनीश्वानौ, गर्तासूकरौ, गोवृषौ, हंसीहंसौ, मृगीमृगौ. सप्तमभवे तौ नं-दनवने जातौ शुकीशुकौ, बाल्ये खगेन धृतौ, स्वर्णपंजरे क्षिप्तौ च. शुक यत्तव पठनव्यसनं । स न गुणः किंतु गुणाभासः ॥ जातं येन तवा—मरणं शरणं पंजरावासः ॥ ६२ ॥ तेन पाठितौ तौ,

तौ विना स क्षणं न तिष्ठति, कल्येऽस्यैव पुरस्योद्यानं क्रीडया समेतो मुनिं वीक्ष्यानंसीत, तदा मुनिस्तस्य कथयति—सव्वंदचारि एयं । केण निमित्तेण मिहुणयं ठवियं ॥ संकडपंजरवासे । निरंतरं दुक्खजणयंमि ॥ ६३ ॥ यत उक्तं—जो ठवइ अन्नजीवे । धरिऊणं विविह दुक्खजालंमि ॥ अन्नभवे सो होही । नाणादुक्खेहिं संजुत्तो ॥ ६४ ॥ इत्यादियुक्त्या तं प्रबोध्य शुकीशुकाववमोचयत्, तौ व्योम्नोड्डीनौ स्वसौधोपरि प्राप्तौ, गतेरनभ्यासात्खिन्नौ, स्नेहस्वाभाव्यात्तव सराज्ञीकस्य करेऽस्थातां, शमस्त्यादि वदंतौ स्वसौधं च पश्यंतौ जातिस्मृतेर्मूर्छितौ, त्वया राज्ञ्या च कृपया तत्कर्णे नमस्कारोऽपाठि, दैवात्तदैवायुः पूर्णं, तूर्णं तौ मृतौ, तत्प्रभावादावां धरणेंद्रपद्मावती जातौ, स्नेहादुपकारित्वाच्च स्ववृत्तज्ञप्त्या धर्मस्थैर्यायाश्चर्यं दर्शयित्वात्रायातौ, हे वत्स धर्मेऽप्रमाद्यमित्युक्त्वा गुरून्नत्वा तौ स्वस्थानं गतौ. इत्थंतरे गोयमो भणइ भयवं संपयंपि सो चेव नागराया ? भयवया भणियं गोयमा ! नो इणमट्ठे समट्ठे सो अजहन्नुक्कोसेणं आउएण चुओ संपयं भयवया पासेणं बोहिओ नागराया. अथ राजापि मंत्रिणा राज्ञ्या च सह द्वादशधा धर्मं प्रतिपद्य गुरूणां विज्ञपयति, भगवन् ! मया नित्यं प्रासुकमेव वारि पेयं, श्रीपर्वतिथौ पौषधः कार्य एव, द्वे एव सच्चित्ते गृहीतव्ये, दी-

Scanned by CamScanner

नदुःस्थानां चान्नदानं दातव्यं, यतः—आर्त्तेषु दीनेषु दयान्वितेषु । यत् श्रद्धया स्वल्पमपि प्रदत्तं ॥ तत्सर्वकामान् विदधाति राज—न्न लभ्यते यद्धनिनां प्रदत्तं ॥ ६५ ॥ गुरुभिरपि भणितं—गिह्निज्जइ जो नियमो । गुरुपयमूलंमि सव्वसत्तीए ॥ पालिज्जइ सो नियमा । जइ ता सव्वं सुहं होइ ॥ ६६ ॥ इत्यादि श्रुत्वा विशेषनियमांश्च लात्वा मुनीन्नत्वा स्वपुरमगात, गुरवोऽन्यत्रागुः. ते त्रयोऽपि सम्यग्धर्मं कुर्वंति. अन्येद्युर्मंत्री स्वयं स्वप्ने खरयुक्तरथस्थं वीक्ष्य प्रबुद्धः स्वायुस्त्रुटितं ज्ञात्वा राज्ञोऽप्युक्त्वानशनाराधनादिपूर्वकं परलोकं प्राप, नृपोऽपि तन्नुचं कृत्वा तत्सुतं सहस्रबुद्धिनामकं तत्पदे न्यस्य गतशोकोऽस्तोकप्रेम्णा प्रियया सह प्राज्यं राज्यं धर्मं च करोति. अन्यदा चतुर्दशीदिने राजा पौषधिक इति सामंतैरपि पौषधिकैरेव सभा पूर्णा, तदा क्ष्मापो धर्मकथां करोति, यथा—पूआ जिणिंदाण सुसाहुसेवा । रई य सामाइयपोसहेसु ॥ सुपत्तदाणं सुगुणाणुराओ । कसायचाओ सिवसुक्खमग्गो ॥ ६७ ॥ दिणे दिणे कंचणलक्खदाणं । जं होइ पुन्नं तु करिंतयस्स ॥ तत्तो य सामाइयकारयस्स । हवेइ अहियं मुणिणो वयंति ॥ ६८ ॥ जो मेरुगिरिसमाणं । रासिं कणयस्स देइ अणुवरयं ॥ जं होइ तस्स पुन्नं । तत्तो पोसहवए अहियं ॥ ६९ ॥ तावद्राजेश्वरः कश्चित्पर्षदं-

Scanned by CamScanner

तर्भूत्वासन्नीभूयेति राज्ञे व्यजिज्ञपत् हे स्वामिन्! कलिंगदेशेशस्तवोपरि सन्नह्यति, तस्य सैन्यं नि- र्यदस्ति, राजाख्यदद्य पर्वदिनमस्ति, राजकथा न कार्यैव. यतः—सामाइयंमि उ कए । अहवा पो- सहवयंमि जिणभवणे ॥ जो पावकहं पकरइ । सो धम्मविराहगो जीवो ॥ १० ॥ तत् श्रुत्वा स दू- रेऽभूत, जने साशंके प्रतोल्यां बुंबाभृद्यथा धावत धावत क्षत्रियाः! शत्रुभिर्नृपहया सरसि वारि पा- तुं गता गृहीताः, सैन्यमेति पुरोपरीति श्रुत्वा केऽपि कातराः पौषधं पारयित्वा केचिदपारयित्वैव त्य- क्तमुखपोतिकादिधर्मोपकरणास्त्वरया स्खलंतो निर्ययुः. राजा तु तत्र वेत्तीव चिंतयति—धन्नाणवि ते धन्ना । पुरिसा निस्सीमसत्तसंजुत्ता ॥ जे विसमसंकडेसुवि । पडियावि चयंति नो धम्मं ॥ ११ ॥ सो धन्नो महुराया । सत्तुग्घनरेसरेण कवडेणं ॥ मारिज्जंतोवि तया । मणसावि न चेव परिकुविओ ॥ १२ ॥ असासाहत्थी रिद्धी । नारीओ वा असासयं सव्वं ॥ इक्कुच्चिय जिणधम्मो । भवंमि सारो अ निच्चोअ ॥ १३ ॥ पुनर्बुंबाकृद्भिरुक्तं कीदृगयं निःसत्वो राजा योऽद्यापि न निर्याति. वयं शत्रुसै- न्यं पश्यामः. सामंतैरूचे स्वामिन् विरूपं दृश्यते, हयास्तावद्धृता एव, अन्यदपि याता, परं हयहरणं क्षत्रियाणामाजन्मकलंकनिमित्तं, यतः—नियजणवयस्स भंगं । हयहरणं वा कलत्तहरणं वा ॥ ते

Scanned by CamScanner

धन्ना निव्ववसहा । जीवंता जे न पिच्छंति ॥ १४ ॥ ततो राजाह—हयाः कस्य गजाः कस्य । कस्य देशोऽथवा पुरं ॥ बहीरूपमिदं सर्व—मात्मीयो धर्म एव हि ॥ १५ ॥ इति नृपे स्थिरे क्षणात्पुरं शांतं जातं, यतः—अवहरइ दुरियरासिं । देइ तहा जयसिरिं च रायाणं ॥ सम्मं जिणिंदधम्मो । तिविहं तिविहेण अणुचिन्नो ॥ १६ ॥ ततः सर्वे सामंतादयो लज्जावनता धर्मोपकरणानि गृहीत्वा राज्ञः समीपे तस्थुः. एवं पौषधं शुद्धं निर्वाह्य द्वितीयेऽह्नि कृतपारणः समं मंत्रिभिरालोच्य कलिंग-देशंप्रति महासैन्यैः प्रतस्थे. गृहे राज्ञी पुण्यतत्परास्थात्, तया चाष्टम्यां पौषधश्चक्रे. दिनमतिक्रम्य रात्रौ कृतावश्यका स्वाध्यायं पठंती यावत्तिष्ठति तावत्स्वं पतिं पुरः पश्यति, किमिदमिति ध्यायंती चिंतापराऽभवत्, तदा सोऽवक् किं ध्यायसि ? पश्य त्वया सह रंतुं सैन्यादागतं स्वं पतिं ? देव्याह हाहा पर्वतिथौ सर्वपौषधव्रते कथं ब्रह्मभंगः क्रियते ? यतः—एवं लोयविरुद्धं । जिणवयणट्ठिओ करेइ जो पावं ॥ अमुणियजिणवयणेणं । को णु विसेसो हवइ तस्स ॥ १७ ॥ ततो राजाह—कुलस्त्रीणां पतिः पूज्यः । पतिर्देवः पतिर्गुरुः ॥ तस्यादेशे न तत्कार्या । पुण्यपापविचारणा ॥१८॥ देव्याह–पुत्त न मित्त कलत्तपहु । न हु वल्लह भरतार ॥ नरइ पडंतां जीवडां । रक्खइ धम्मविचार

॥ ७९ ॥ राजा प्राह प्रिये कथं श्लथं स्नेहं करोषि ? यतः—भास्वान् वेषः कलावांस्तव वचनविधि
र्नृविलासोऽपि वक्रः । सौम्यस्पर्शो गुरुश्च स्तनकलशभरो ह्यष्टमीचंद्रभालः ॥ मंदो ह्यामस्तमःश्रीर्वि-
नचिकुरचयः सुभ्रुवां त्वं च केतुः । सेवामेवंविधास्ते विदधति दयिते रक्ष कामग्रहान्मां ॥ ८० ॥ सा
तु तंप्रत्येद्गतेऽपि न, राजा पुनराह नहिं त्वदुपर्यहं द्वितीयां कन्यां परिणेष्यामि, त्वया सह वक्ष्याम्य-
पि न. तदा राज्ञ्यवदत्—लब्भंति विउला भोगा । लब्भंति सुरसंपया ॥ लब्भंति पुत्तमित्ताणि ।
एगो धम्मो न लब्भइ ॥ ८१ ॥ सोऽद्दृष्टोऽभूत्. अथ सा चिंतयति किमिदमिंद्रजालं सत्यं वेति वि-
चिंत्य क्षणं निद्रासुखमनुभूय धर्मजागरिकां करोति, यथा—साग्गिमहनहवुड्ढा । नमणिज्जा सुंदरी
महानागा ॥ सट्ठिसहस्सं वरिसा । विहीओ जिए तवो परमो ॥ ८२ ॥ सा जयउ जणयपुत्ती । द-
समुहवयणेहिं सीलसंनाहो ॥ जीए गओ न भेओ । संकडपडिएणवि थोवंपि ॥ ८३ ॥ एवं शुद्धं पौ-
षधमाराध्य प्रातःकृत्यं विधाय पारितपौषधा जिनपूजासाधर्मिकवात्सल्यदीनदानादिधर्ममार्गं प्रकाश्य
सुपात्रदानं दत्वा सा पारणकं करोति. सा स्वस्थैव धर्मं करोति सदा, पुनरपि तयागामिन्यां चतुर्द-
श्यां पौषधे कृते तत्रत्यमांडलिकमकरध्वजेनोक्ता तस्याः सुता सायं समेताह हं मातस्तावद् गृहे न

तातः, परिणेतुं चलिष्यति च मे देवरः प्रातः, स्नानशीर्षग्रथनादिसामग्रीं मे कारय ? सावद्याहं न करोमि न कारयामि, यतः—गहिऊण पोसहवयं । सावज्जं जो करेइ मूढप्पा ॥ सो देवतिरियमणुस्साणं । कुत्थियजोणिं लहइ नूणं ॥ ७४ ॥ सा रोषं कृत्वा रुदती पश्चाद्ययौ, न पुना रत्नवत्या सावद्यवार्तापि कृता, नारीणां पुत्रेभ्योऽपि पुत्रीणामुपर्यधिकः स्नेहः. यतः—नारीणं पुण धूआ । पुत्तेहिं तोवि वल्लहा अहियं ॥ जामाया पूइज्जइ । न वहू पूइज्जइ जम्हा ॥ ७५ ॥ प्रातरमावास्यायां राइया पौषधे पारिते धवलेषु श्रूयमाणेषु त्वरमाणः समेतो जामाताह हे श्वश्रु ! पश्य ? चलितो वरः, स्वसृमातृप्रभृतयो व्यग्राः संति, स्नपय मां ? सावदन्नाद्य पर्वदिने मज्जनादि करोमि कारयामि वा. तदा स स्मित्वाह—थीयह तिन्नि पियारडां । कलिकज्जलसिंदूर ॥ अन्नइ तिन्नि पियारडां । दूध जमाइ नूर ॥ ७६ ॥ सावदन्मोहमूढानामेतानि वल्लभानि, उत्तमजनानां पुनर्देवगुरुधर्मरूपं रत्नत्रयं ज्ञानदर्शनचारित्ररूपं रत्नत्रयं वा प्राणप्रियं भवति. यतः—देवो जिणिंदो जिणरायधम्मो । जिणिंदधम्मंमि ठिया मुणिंदा ॥ पाणप्पिए तिन्निवि हुंति एए । तिलोअसारे खलु पंडिआणं ॥ ७७ ॥ जिणिंदबिंबं च जिणिंदवाणी । जिणागमज्झयणपरायणा या ॥ सन्नाणसम्मत्तचरित्तरूवं । रयणत्तयं वा

Scanned by CamScanner

पुण वज्झइ ॥ ८८ ॥ अत्र संसारकथा श्रूयतेऽपि न, स कथ्रोऽवददहो कपटधर्मिणी त्वं ? यदान्यां
कन्यां परिणीय त्वद्दुहितुः शल्यं ददे तदाहं मकरध्वजो नान्यथा, गतश्च सः, अथ कलिंगदेशेशं
विजित्य सार्धं सैन्यमप्यागात्, स्वशेखरो राजा दिने पौषधो नाऽदिनि रात्रिपौषधं सौधांतर्गत्वाक-
रोत्, स यावत्प्रतिक्रमणादिक्रियां कृत्वा ध्याने नमस्कारादि स्मरन्नस्ति, तावदजनि नूपुरध्वनिः, आ-
याता वरतारहारा सविकारा करे पत्रवीटकधरा राज्ञी रवरती, जगौ च कांत स्तोकस्नेहेनैव विपर्य-
स्तोऽसि, व्याहृतापि नाहं, राजा तामेदानेऽपि न, पुनः साह—प्राणनाथ त्यज ध्यानं । किं ध्याने-
न तवाधुना ॥ ध्यानेऽपि वर्तते वेला । नाति सर्वत्र शोभते ॥ ८९ ॥ राजाहाद्य पर्वदिनमस्ति,
कृतपौषधोऽस्म्यहं, विषयकथा त्वया न कार्या, त्वदागमनमप्यत्र न युक्तं, किं न वेत्सि ? यत उ-
क्तं-अन्यमुद्राकृतं पापं । तुट्यते जिनमुद्रया ॥ जिनमुद्राकृतं पापं । वज्रलेपो भवेद् ध्रुवं ॥ ९० ॥
अन्याहनि कृतं पापं । मुच्यते पर्ववासरे ॥ पर्वाहनि कृतं पापं । वज्रलेपो भवेद् ध्रुवं ॥ ९१ ॥ साह
सर्वं वेद्मि, परं कारणं मदनपरवशतैव, यत उक्तं—तपस्तावज्जपस्तावत्—तावद्धर्मविचारणा ॥ याव-
ज्ज्वलति नांगेषु । हतः पंचेषुपावकः ॥ ९२ ॥ ततो राजाह–धन्नो दसरहपुत्तो । नरहो नामेण संड-

लाहिवई ॥ जो जुवइस्सेवि न । खोहिओ विविहविन्नवंमि ॥ ९३ ॥ एवं ध्यात्वा स कायोत्सर्गे स्थितः. ततः सा—कामविसयगिद्धा । खोभेइ निवं विरूवरूवेहिं ॥ सुरसेलुव्व परं नो । निमेसमित्तंपि सो खुहिओ ॥ ९४ ॥ अथवा प्राणेश ! ज्ञातं तेऽपि वृत्तं. त्वमन्यस्यां युवत्यां रक्तोऽसि, मदुक्तं चेन्न मन्यसे तदा पश्य मत्कृतं प्रातरित्युक्त्वा सा गता. नृपोऽपि भवभावनां विभावयन् विभावरीं व्यतिक्रम्य रजन्यां विभातायां प्रभाते कृतप्राभातिकृत्यो नभः प्रभाकरमिव सभामभासयत्, तावदन्तःपुरांतस्तुमुलो राज्ञी याति यातीति. राज्ञि सन्येषु चोन्नेत्रेषु रत्नस्वर्णभृतां रक्तकरभीमारूढा कस्यापि यूनो नरस्य वामांगस्था मदुक्तं न कृतं तत्पश्य मत्कृतमिति नृपंप्रति वदंती सा पुरतश्चचाल. राजा विचारयति—धिग् नारीः कृत्रिमस्नेहा । यासां कोऽपि न वल्लभः ॥ किंतु कामविमूढानां । विषया एव वल्लभाः ॥ ९५ ॥ अनया किं कार्यं ? परं जनापवाद इति ससैन्यः पृष्ठतो निरगात्, पुरो गच्छन् पश्यत्यरण्यं, न सैन्यं दृश्यते, देव्याः करभी क्वापि दूरे क्वाप्यासन्ने चेदृश्यते, राज्ञो हयस्तृषितो न चचाल, पानीयं वीक्ष्य तं पातुमुत्ततार, स वाजी मृतः, अहो दैवस्यावसरो न यातीति ध्यायन् मध्याह्ने सूर्यकरैस्तप्तोऽवक्—परपुरुषादिव सवितुः । संप्रति भीताः कराग्रसंस्पर्शात् ॥

Scanned by CamScanner

कुलवध्व इव सलज्जाः । प्रविशंति गृहोदरं गायाः ॥ ९६ ॥ न तु मत्प्रिया. एवं क्षुत्तृषातुरो याति तावदाम्रफलहस्तः कोऽपि द्विजस्तमुवाच भद्र उपोषित इव क्षुधितोऽसि, लाहि फलानि ? राजाह नाहमप्रत्याख्यानस्तिष्ठामि, फलादनादनु वारि विना कथमाचाम्यामि ? तावदन्यः श्रवज्जलकरपात्रो द्विज आगात् पिब पय इति ब्रुवन्, राजाह नाहं सचित्तं वारि पिबामि कदाचिदपि. ताभ्यामुक्तं मूर्ख ! प्राणा यास्यंति. राजाह—धनं यातु गृहं यातु । यांतु प्राणाः प्रियान्विताः ॥ साभिग्रहं पर्वदिनं । जातुचिन्नैव यातु मे ॥ ९७ ॥ अपि च–गहिऊण पव्वनियमे । जो भंजइ नियपमायदोसेणं ॥ सो दुक्खसहस्सभरियं । पावइ तिरियत्तणं बहुहा ॥ ९८ ॥ पुनस्ताभ्यामुक्तं त्वं क्व प्रस्थितोऽसि ? राजाह कापि दृष्टा करभी ? ताभ्यामूचेऽग्रे याति, तत उत्तीर्य नृमिथुनं वृक्षमूले स्नेहालापं कुर्वदस्ति, चेत्कार्यं तत्तत्र याहि ? इति श्रुत्वा लज्जयावनतमूर्धा नृपश्चिंतयत्यहोऽतीवगहनं स्त्रीचरित्रं, यतः—जे निम्मलबुद्धिधरा । जाणंति खणेण सव्वसत्थाइं ॥ तेवि महिलाण चरियं । नाउं तीरंति नो कइया ॥ २०० ॥ जा जाणइ जिणवयणं । कुणइ तहा विविहिधम्मकिच्चाइं ॥ सावि हु विसयपसत्ता । मुंचइ लज्जंपि धम्मंपि ॥ १ ॥ तहावि मा दुग्गइगमणं भवउत्ति गंतूण एयं पडिबो·

Scanned by CamScanner

हेमि. यतः—जो अन्नं पावरयं । पडिबोहइ सुद्धधम्मबुद्धीए ॥ तस्स पुण बोहिलाभो । सुलहो हु-ज्जा परभवंमि ॥ २ ॥ यावदेवं विचिंत्य राजा गंतुं लग्नस्तावन्नारण्यं, न द्विजौ, न किमपि, किंतु स्वं स्वसौधांतः प्रियायुतं सिंहासनस्थं पश्यति, यावद्राजा संभ्रांत इतस्ततो पश्यति तावता तस्योपरि पुष्पवृष्टिं कृत्वा चलत्कुंडलो देवः कश्चित्प्रत्यक्षोऽभवत्. मामुपलक्षयसीत्युक्ते राजाह त्वं देवः, स रूपं परावृत्योचेऽथोपलक्षयसि ? राजावक्त्वं मतिसागरो मंत्री, परं मृतः कोऽपि न जीवतीति किमिदं ? सोऽवदत् शृणु ?—अहं तव मंत्री समाधिनाऽमृत्वा ब्रह्मलोके सुरोऽभवं, अंतर्मुहूर्तपर्याप्तस्तरुणनरसदृक् स सुरः पल्यंकोत्थितो देवदेवीभिः स्तूयमानोऽभिषेकादिसभासु कृतकृत्यः सिद्धायतने जिनानपूजयत्. इत्थंतरे गोयमो भणइ भयवं कहं जिणा पूइया ? जिणो भणइ जहा रायपसेणिओवंगे सूरियाभदेवेण. तथा—वरकुसुमधूवअक्खय—फलजलनेवज्जधूवदीवेहिं ॥ अठविहकम्महणणी । जिणपूया अठहा होइ ॥ ३ ॥ यावत्स देवः सभामंडपे सिंहासने उपविष्टस्तावद्देववृंदं श्रीसीमंधरस्वामिनं निनंसु ज्ञात्वा सोऽप्यचलत्, प्रणतो भगवान् सीमंधरः तस्स का उप्पत्ती ? जया णं इह भरहे कुंथुजिणो सिद्धो, अरतित्थंकरो अज्जवि न उप्पन्नो, एरिसे समए पुव्वविदेहे पु-

क्खलवईए विजए पुंडरीगिणीए नयरीए भयवं सीमंधरो जाओ, एवं सुव्वयनमिणंतरे निक्खंतो भ-विस्साणंदो उदयपेढालजिणाणमंतरे सिद्धिहा. उक्तं च—पुक्खलवईए विजए । पुव्वविदेहंमि पुंडरीगिणीए ॥ कुंथुअरअंतरंमि । जाओ सीमंधरो भयवं ॥ ४ ॥ सुव्वयजिणनमिणो अं—तरंमि रज्जुं चइत्तु निक्खंतो ॥ सिरिउदयदेवपेढाल—अंतरे पाविही मुक्खं ॥ ५ ॥ श्रूयतेऽपि—यदात्र भरतक्षेत्रे । राजा दशरथोऽभवत् ॥ तदा सीमंधरस्वामी । विदेहे व्रतमग्रहीत् ॥ ६ ॥ तेन सुरेण प्रभोर्देशनाश्रावि, दैवयोगाज्जिनेनापि व्याख्याने पर्वतिथिरेव वर्णिता, यथा—धम्मो जिणिंदभणिओ । कायव्वो उत्तमेण पइदिवसं ॥ जम्हा जीवाण पुणो । सुदुल्लहा धम्मसामग्गी ॥ ७ ॥ जइ सव्वया न पारइ । धम्मं काऊण सयलसुहमूलं ॥ ता पव्वेसु करिज्जा । जिणिंदभणिएसु सव्वेसु ॥ ८ ॥ धम्मस्स अणुट्ठाणं । नियमा पव्वेसु जो कुणइ निच्चं ॥ अणवरयं पुण झाणं । जायइ धम्मस्स तस्स मणो ॥ ९ ॥ पव्वेसु कीरमाणो । धम्मो भावेण होइणंतगुणो ॥ अन्नदिणविहियधम्मा—णुट्ठाणफला उ पाएण ॥ १० ॥ ततः सुरेणोक्तं हे प्रभोऽस्ति कश्चित्तस्यां पर्वतिथौ दृढः? प्रभुराह घना जनाः संति, विशेषतो भरतक्षेत्रे रत्नशेखरो राजा तद्राज्ञी च, तौ देवदैत्यैरप्यक्षोभ्यौ,

Scanned by CamScanner

स्वस्वामिवर्णनाकर्णनमुदितोऽहमत्रागतः, परचक्रागमादिना परीक्ष्य मिलितः सोऽहं. स्वामिनौ ! ध-
न्यौ युवां, यौ जिनः प्रशंसति, यतः—सो चेव होइ धम्मो। परमत्थेणवि मुत्तिसुक्खकरो ॥ जं वी-
यरायपमुहा। अणुमन्नइ उत्तमा पुरिसा ॥ ११ ॥ सव्वोवि होइ धम्मे। निरओ पाएण मुक्खसमयं-
मि ॥ आवयपमिओ कोवि हु। विरलच्चिय होइ धम्मपरो ॥ १२ ॥ एवं तौ स्तुत्वा नत्वानिच्छाया-
मपि तान्यां श्रृंगारं दत्वा देवो दिवं ययौ, राजापि राज्यं कुर्वन् सर्वदेशजनैः श्रीपर्वदिनमपालय-
त, सप्तमीत्रयोदशीसंध्यायां प्रातः पर्वेति पुरे पटहोद्घोषणापूर्वममारिमकारयत. पौषधपारणके सुश्रा-
द्धवात्सल्यं च करोति. यतः—जिणसासणस्स सारं। जीवदयानिग्गहो कसायाणं ॥ साहम्मिय-
वच्छल्लं। भणंति मुणिणो मुणियतत्ता ॥ १३ ॥ प्रासादैस्तेन पृथ्वी मंडिता. एवमखंडितं श्रीपर्वदिनं
द्वादशविधधर्मयुक्तं प्रतिपाल्य स प्रांते कृताराधनानशनोऽच्युतदेवलोके इंद्रसामानिकः सुरोऽभूत्. र-
त्नवत्यपि राज्ञी तथैव कृतानशनेशाने देव्यभूत्, रत्नशेखरदेवोऽपि तत्र तामेव वल्लभां चक्रे. इत्यं तरे
गोयमो भणइ भयवं ! सो सिद्धीं पाविही ? सामी भणइ गोयमा ! इहेव भरहे रयणपुरे रायकु-
ले जम्मं पाविऊण जिणपासे दिक्खं पडिवज्जिऊण ते तिन्निवि जीवा केवलनाणिणो सिद्धिं ग-

मिस्संति, सव्वदुक्खाणमंतं करिस्संति. तओ तारिसं पव्वदिणं पालेयव्वं, जारिसं एएहिं पालियं. जे जीवा एयं कहं सोऊणं सिरिपव्वदिणं पडिवज्जंति ते आसन्नभव्वा नायव्वा. एवं श्रीवर्धमानप्रभुर्बहून् जनान् पर्वतिथिदिनपालने कृतसच्चित्तादित्यागं प्राबोधयत्. श्रीश्रेणिकनरेंद्रप्रभृतयो जना हृष्टा निजस्थानं ययुः. प्रभुरपि चतुस्त्रिंशदतिशयसमेतो वसुंधरां व्यहरत्. एवं जो आणाए। धम्मं पव्वेसु जिणवरुद्दिठं ॥ तिगरणसुद्धं पालइ। सुरासुरेहिंपि अक्खुहिओ ॥ १४ ॥ सो लहिऊण समिद्धिं। मणुइठं रयणसेहरनिव्वुव्व ॥ पावइ कमेण सिद्धिं। केवललद्धीं वरिऊणं ॥ १५॥ जइ पसुभवंमि एवं। पव्वदिणं पालियं कुणइ सुक्खं ॥ ता जइ मणुअभवंमि। पालिज्जइ जेहिं भावेण ॥ १६ ॥ इंदपयं चक्किपयं। अहमिंदपयं तहेव परमपयं ॥ ते पावंति कमेणं। तिलोअलोआण नमणिज्जा ॥ १७ ॥ सुणिऊणमेवमेयं। चरियं सिरिरयणसेहरनिवस्स ॥ पंचसु पव्वेसु सया। कायव्वो उज्जमो धम्मे ॥ १८ ॥ एयं रयणवईए। चरियं तह रयणसेहरनिवस्स ॥ निसुणिज्जंतं जायइ। भवियाणं बोहिलाभत्थं ॥ १९ ॥ इति श्रीपर्वतिथिदिनविचारे जगज्जनमनश्चमत्कारकारिणी महाप्रतिबोधदायिनी श्रीमद्रत्नशेखरनरेंद्ररत्नवतीराज्ञीकथासंबंधरचनेयमिति. ॥ दयावर्धनविज्ञेनो—द्धृतैषा

Scanned by CamScanner

प्रवरा कथा ॥ समयांबुनिधेर्मध्या—द्धरित्र्यां जयताच्चिरं ॥ १ ॥

॥ इति श्रीरत्नशेखरचरित्रं समाप्तं ॥

॥ समाप्तोऽयं ग्रंथो गुरुश्रीमच्चारित्रविजयसुप्रसादात् ॥

लब्ध्वा यदीयचरणांबुजतारसारं । स्वादब्बटाधरितदिव्यसुधासमूहं ॥
संसारकाननतटे ह्यटताब्लिनेव । पीतो मया प्रवरबोधरसप्रवाहः ॥ १ ॥
वंदे मम गुरुं तं च । चारित्रविजयाह्वयं ॥ परोपकारिणां धुर्यं । चित्रं चारित्रमाश्रितं ॥ २ ॥ युग्मं.

चारित्रपूर्वा विजयाभिधाना । मुनीश्वराः सूरिवरस्य शिष्याः ।
आनंदपूर्वविजयाभिधस्य । जातास्तपागच्छसुनेतुरेते ॥ ३ ॥

---

आ ग्रंथ श्रीजामनगरनिवासी पंडित श्रावक हीरालाल हंसराजे स्वपरना श्रेयमाटे पोताना श्रीजैनभास्करोदय छापखानामां छापी प्रसिद्ध कर्यो छे.

Scanned by CamScanner